श्रावकप्रज्ञप्तिः

श्रीहरिभद्रसूरिविरचितटीकासहिता ।

प्रेमचन्द्रतनुजेन केशवलालेन

संशोधिता ।

सा च

मुम्बयीस्थज्ञानप्रसारकमण्डलनामसमाजेन

प्राकाश्यं नीता ।

मुम्बय्याम्

निर्णयसागरयन्त्रालये मुद्रिता ।

शक १९११.

मूल्यं रू. ०-१०-०

आमुखम् ।

श्रावकप्रज्ञप्तिनामधेयोऽयमेकाधिकचतुःशत(४०१)पद्यात्मको ग्रन्थः पुरा मागध्यां प्रणीतोऽस्ति । एनं च सुगृहीतनामधेयः श्रीहरिभद्रसूरिष्टीकया समलंचकार । ग्रन्थस्यास्य प्रणेता कदा को वा समभूदित्येतत्तु शक्यते सम्यङ् निर्णेतुम् । भगवतोः सूरिप्रवरपर्ययोः श्रीहरिभद्रोमास्वात्योरन्यतरः को वाऽस्य रचयितेत्येतदपि संदेहदोलारूढमेव ।

भगवता श्रीहरिभद्रसूरिणैवायं स्वोपज्ञटीकासटीको निरमायीति वक्ष्यमाणप्रमाणैरवगम्यते । तथाहि—

१ चतुःसप्तत्यधिकसप्तदशशत(१७७४)प्रमिते विक्रमाब्दे श्रीमता लावण्यविजयेन स्वोपज्ञटीकासनाथो द्रव्यसप्ततिर्नाम ग्रन्थो व्यरच्यत । तत्र च षट्पञ्चाशत्तमगाथायाटीकायाम् "यदाहुः श्रावकप्रज्ञप्तौ श्रीहरिभद्रसूरिपादाः" एवमलिख्यत । तदनन्तरमस्यामेव टीकायां प्रस्तुतग्रन्थस्यैव चतुर्दशोत्तरशततः (११४) प्रभृति गाथा प्रमाणत्वेनावतारिता । ततः स ग्रन्थरचयितृत्वे भगवान्हरिभद्रसूरिरेव रचयामासेति मनुत इति भाति ।

२ तथाङ्गीकृत्यैकृत्रिंशद्गाथान् सूरिरभयदेवः श्रीहरिभद्रसूरिमेवैतद्ग्रन्थस्य पञ्चाशकं व्यधृणोत् । तत्र च स पूर्वैरेवोक्तमित्यभिधाय "सोपस्तदंगणाई" इत्येतामेव गाथामवातारयत् । तेन चैतन्मूलान्मवोऽप्यस्यं ग्रन्थो भगवता श्रीहरिभद्रसूरिणैव व्यरच्यतेति निश्चीयते ।

३ श्रीमानविजयगणीते श्रीयशोविजयसंशोधिते धर्मसंग्रहाभिधानग्रन्थरत्ने द्वादशतमव्रतप्रसङ्गेऽयमभ्यधायि । तदुक्त-इत्थ-

स्वातिविरचितश्रावकप्रज्ञप्तौ तु अतिथिशब्देन साध्वादयश्चत्वारो गृहीताः। ततस्तेषां संविभागः कार्य इत्युक्तम्। तथा च तत्पाठः। "अतिथिसंविभागो नाम अतिथयः साधवः साध्व्यः श्रावकाः श्राविकाश्चैतेषु गृहमुपागतेषु भक्त्याभ्युत्थानासनदानपादप्रमार्जननमस्कारादिभिरर्चयित्वा यथाविभवशक्ति अन्नपानवस्त्रौषधालयादिप्रदानेन संविभागः कार्यः" इति। श्रीमुनिचन्द्रसूरिविरचितधर्मबिन्दुटीकायां द्वादशतमव्रतप्रस्तावे श्रीवादिदेवसूरिरप्येवमेवाह। अनेन च संस्कृतेऽपि श्रावकप्रज्ञप्तिर्नामातिविस्तृतो ग्रन्थः श्रीमदुमास्वातिविरचितोऽभूदित्यवगम्यते। अयं पुनः प्रस्तुतो ग्रन्थो मागध्यां मूलात्मको विद्यते। ततो निर्णीयते नायं भगवदुमास्वातिप्रणीतो भवेदिति।

१ श्रीमदुमास्वातिविरचिता श्रावकप्रज्ञप्तिरस्तीत्येतद्विचारामृतसंग्रहादिग्रन्थैरपि निश्चीयते।

२ पञ्चाशकटीकायां श्रीमता नवाङ्गीवृत्तिकृताभयदेवसूरिणेदमभ्यधायि। तद्यथा—वाचकतिलकेन श्रीमतोमास्वातिवाचकेन श्रावकप्रज्ञप्तौ सम्यक्त्वादिः श्रावकधर्मो विस्तरेणाभिहित इति। ततश्चेदमेवात्र जिज्ञास्यं यदेनमुमास्वाती रचयामास वा न वेति।

३ ग्रन्थस्यास्य मूलगाथान्ते प्रायः सर्वत्र 'उमास्वातिविरचिता सावयपन्नत्ती संमत्ता' इति लिखितं दरीदृश्यते। एतदपि चास्योमास्वातिवाचकः प्रणेतेति मनने मानम्।

भगवता श्रीहरिभद्रसूरिणास्योपरि टीका व्यरच्येतति ग्रन्थान्त-लेखपर्यालोचनया स्पष्टं प्रतीयते ।

इदं च प्रस्तुतसूरिविरचितस्य स्वोपज्ञटीकासंवलितस्य शास्त्र-वार्त्तासमुच्चयस्यामुखपर्यालोचनया तथा जिनभद्रसूरेरन्तेवासितां-स्वयमेवायमुररीचकारेत्यादिकारणैश्चावसीयते । प्रान्ते विरहाङ्का-भावान्नायं विरचितो भगवता हरिभद्रसूरिणेति नाशङ्कनीयम् । यतो योगविन्दुप्रमुखा विरहाङ्कविनाकृता अप्यनेके तद्रतिचा ग्रन्थाः समवलोक्यन्ते । चतुश्चत्वारिंशदधिकचतुर्दशशत(१४४४) ग्रन्थानां निर्मातेति भुवनप्रतीतोऽयं सूरिः पञ्चत्रिंशदधिकपञ्चश ते (५३५) वैक्रमेऽब्दे देवलोकं स्वप्रत्यासत्त्या मण्डयामास ।

उमास्वात्यपेक्षयास्याधिकाः सन्ति प्रचलिता ग्रन्था इति तच्च-रितं तत एवावगन्तव्यम् ।

श्रीमानुमास्वातिरपि पञ्चशतं ग्रन्थान्व्यरचयदित्येतिह्यमात्रम् ।

वृहद्गच्छीयेन श्रीहरिभद्रसूरिणापि वैक्रमीयपञ्चाशीत्यधिकैकाद-शशत(११८५)प्रमिताब्दविरचितायां प्रशमरतिटीकायामेवमेवो-क्तम् ।

तत्त्वार्थाधिगमः प्रशमरतिर्जम्बूद्वीपसमासश्चेति ग्रन्थत्रयं श्री-मदुमास्वातिवाचकप्रणीतमुपलभ्यते । पूजाप्रकरणं नामैको ग्रन्थ एकोनविंशतिश्लोकात्मक एतद्विरचितो भवेदिति कथनमात्रम् । एतद्विरचिताप्यन्या श्रावकप्रज्ञप्तिर्भवेदित्येतद्धर्मसङ्ग्रहादिग्रन्थै-रपि निश्चीयते । एतद्विरचितजम्बूद्वीपसमासान्तर्लेखादवग-म्यते । तद्यथा—कृतिरियं सिताम्बराचार्यस्य महाकोपरुमास्वातिवा-चकस्येति ।

अयं सूरिः प्रागतिप्राचीनसमये समुदियायेत्येतदनन्तरोक्तप्रमाणेभ्यः प्रमीयते। नात्रेपदपि संदेहदावदग्धं किमपि।

विषये प्रस्तुते डॉक्टरपिटर्सनेन प्रकाशिते तार्तीयीके रिपोर्टाभिधेये प्रसिद्धिपुस्तके षट्त्रिंशत्तमे पृष्ठे—श्यामाचार्यो नाम वाचकवर्यान्तेवासी श्रीवीरनिर्वाणात्षट्सप्तत्यधिकशतत्रय(३७६)प्रमिते हायनेऽनेहोधर्ममभ्याजगामेत्यलिख्यत। बलिसहस्यान्तेवासी स्वातिर्गुरुः श्यामाचार्यस्य इति पट्टावल्यामवलोक्यते। परं स स्वातिरयमुमास्वातिश्चेति द्वावप्येकनरनामनी इत्येतदपि संदेहकलितम्।

तत्त्वार्थभाष्ये दशमेऽध्याये समाप्तिसमय उमास्वातिवाचक उच्चनागरीशाखीय इति स्वयमेवालिलिखे। उच्चनागरीशाखा श्रीमहावीरस्वामिद्वादशपट्टनिवासिनः श्रीमदार्यशान्तिश्रेणिकादाविर्बभूवेति कल्पसूत्रान्तर्गतस्थविरावल्याम्।

श्रीमहावीराष्टमपट्टोदयोदितस्य भगवतः श्रीमदार्यमहागिरेरन्तेवासी बलिसहाचार्यो ऽभवत्।

तत्त्वार्थाधिगमीयदशमाध्यायावसाने स्वयं लिखितात्स्वचरितादयदवगम्यते तद्यथा—शिवश्रीप्रशिष्यः श्रीमद्घोषनन्दिश्रमणशिष्यः वाचनान्वयेन तु मुण्डपादप्रशिष्यः मूलवाच्यवाचकाचार्यशिष्यः श्रीमदुमास्वातिरभूदिति। जन्म च तदीयं न्यग्रोधिकासंनिवेशे समभवत्। विहारागतकुसुमपुरे ऽयं व्यरच्यत। स्वजनुषायं कौभीषणगोत्रमभूषयत्। आसीत्स्वातिर्नामैतज्जनिकर्ता

। गुरुजननिरतास्य जननी पुत्रवत्सला वत्सगोत्रभवा।

ग्रन्थेऽस्मिन्ग्रथिता ये विषया विद्यन्ते ते विद्वज्जनैर्विदित्वा वि-

चार्याः सततमाचर्याश्च ततोऽविरतं विभवविराजितैर्विभागविरतैर्यावज्जीवं स्वान्ते स्मर्तव्याः ।

ग्रन्थेऽस्मिन्प्राङ्मङ्गलाभिधेयाभिधानानन्तरं श्रावकशब्दो व्याख्यायत । तद्यथा–यः सम्यक्त्वादिधरो यश्च प्रतिदिनं साधुसमीपे समागत्य स्वकीयां सामाचारीमाकर्णनात्कर्णयोः पावयित्रीमाकर्णयति स श्रावक इति श्रवणविषयेणाभिधीयते । यतः श्रावकलक्षणे सम्यक्त्वं श्रावकाणुव्रतानि चायान्त्यतस्तत्स्वरूपमत्र यथाक्रममभिधाय सामाचारी कथिता । सम्यक्त्वस्वरूपकथनावसरे प्रसङ्गेन कर्माष्टकस्वरूपं तत्त्वविवरणं सम्यक्त्वातिचाराश्चाकथ्यन्त । अनन्तरं सम्यक्त्वोदयान्मानसी परिणतिः कायव्यापृतिश्च कीदृक्स्वरूपमवलम्बत इत्येतदभिदधे ।

द्वादशाणुव्रतसमर्थनावसरे च प्रथमस्य प्राणापातविरतिसमाख्यस्य तथा नवमस्य सामायिकनामधेयस्याणुव्रतस्यातीवप्रशस्यता प्रतिपादिता समुपलभ्यते । प्राणातिपातविरतिप्रतिपत्तिप्रतिपादनावसरे च प्रत्याख्यातिनिराकृतिवादिनां परकीयप्राणहृत्प्राणभृत्प्राणव्यपरोपणं न दुष्कृतिकृतिबन्धकं प्रत्युत श्रेयोनिबन्धनमिति विवदमानानां, एकान्ततो नित्योऽनित्यो वा जीव इति प्रतिपन्नानाम्, मोचकवाचकवाच्यानामज्ञानिनां मतानि तत्तद्युक्तिसमालम्बनेन समर्थ्य तत्खण्डनं सुखावबोधमकारि। अवसाने चाविरतिरेव कर्मबन्धहेतुत्वात्कर्मेत्युक्तम्। नवमे च सामायिकाख्याणुव्रते देशविरतानां त्रिविधत्रिविधप्रत्याख्यानाभावःकथमस्तीति सम्यक्प्रतिपादितम्। सामायिकं शश्वद्विधेयमिति प्रतिपाद्य

जिनपूजा हिंसाप्रचुरेति वादिनो मूका विदधिरे । तदनन्तरं गामान्तरगच्छतः श्रावकस्य सामाचारी वर्णिता । तद्यथा तत्रस्थ श्रावकादिसाधर्मिकमिलनम् । दर्शनाय जिनसदनेषु गमनम् इत्यादयोऽपूर्वा विषयाः प्राचीनपद्धतिं परितोऽवलम्ब्य प्रतिपादिताः । अन्ते च संलेखनां लेखनुतामखिलविरतिविधेयां विधिविषयत्वेन प्रतिपाद्य मुक्तिरेव धर्मप्राप्तेः प्रधानं फलमप्रधानं स्वर्गमनप्रभृतीति प्रत्यपादि । अन्ते च शोभानाः स्वकीया अध्यवसाया भव्यजनहिताय प्रादुश्चक्रिरे । ततः प्रमासमेतान्प्रतिप्रमादान् क्षमयित्वा ग्रन्थः पर्यसमाप्यत ।

सांप्रतमस्याङ्कनविषये किंचिन्मात्रमुच्यते ।

मूलात्मकस्यास्य त्रीणि पुस्तकानि चत्वारि च टीकायाः समलभेऽहम् । तत्र त्रीणि मूलसमलंकृतानि त्रिपाठपत्रात्मकानि । चतुर्थं तु मूलसमुज्झितं केवलं टीकात्मकमेव । एषां विभागद्वयं विधीयेत । तदित्थम् ।

१ (क) देवशापाटकान्तर्वर्त्तिपं० दयाविमलहस्तगतभाण्डागारान्तर्गतमेकं मूलात्मकं पुस्तकम् ।

(ख) पं० आनन्दसागराणां मूलात्मकं पुस्तकम् । एतत्पुस्तकद्वयमेकस्याः प्रतेः प्रतिबिम्बमेव ।

२ पं० गुलाबविजयानां मूलपुस्तकम् । इदं च पूर्वस्मात्पुस्तकाद्भिन्नमेव भाति ।

३ पं० गुलाबविजयानां टीकापुस्तकं मूलं विनाकृतम् ।

४ (क) पं० दयाविमलानाम् ।

(ख) पं० कान्तिविजयानाम् ।

(ग) पं० धीरविजयानाम् ।

सटीकं पुस्तकत्रयमेतत्साक्षात्परंपरया चैकपुस्तकलिखितमिति भाति । अत एतत्पुस्तकत्रयमप्येकपुस्तककल्पम् ।

प्रस्तुतपुस्तकं प्रायेण (१) एतत्पुस्तकपाठं प्रमाणीकृत्य संशोधितम् ।

अनेन स्पष्टमवगम्यते यदहं पुस्तकद्वयं मूलस्य तथा पुस्तकद्वयमेव टीकायाः प्राप्तवम् । सकलान्यप्येतानि सन्ति पुस्तकान्यतीवाशुद्धानि । ततोऽस्येपदङ्कनानन्तरमर्थाङ्कितमेवेदमास्तामिति विचारितम् । तथापि यथादर्शं पुस्तकमङ्कनीयमिति प्रयोजकाभिप्रायमनुसृत्यैतदङ्कितम् । शुद्धपुस्तकलाभात्कुत्रचिच्च मदीयाज्ञानात् बहून्यशुद्धस्थलानि संदृश्येरन् । तानि शुद्धीकृत्य विबुधैर्योचनीयानि पत्रप्रेषणद्वारा मां प्रति विज्ञपनीयानि च । येन द्विःकृत्योऽङ्कनावसरे शुद्धीकृत्याङ्कयिष्यामः ।

अस्याङ्कनेऽकारि साहायकं जैनपत्रिकाधिपतिना शा० फत्तेचंदारमजेन भगूभाइना । अतस्तदुपकृतिं स्मरामः । अस्याङ्कयित्री ज्ञानप्रसारकसभा वर्त्ततेऽतः सार्हत्यतीव धन्यवादम् । एतस्यां समग्रग्रन्थशोधनादौ पं० आनन्दसागरैरतीव श्रममुररीकृत्यारिमन्कार्ये सहायताकारि । अतोऽङ्कितस्यास्य ग्रन्थस्योदये मूलाधारभूतास्त एवेति मन्ये । अतः सविनयं स्मरामि तेषामुपकृतिमात्रमत्र केवलम् । यतस्तान्प्रति मत्युपकर्तुं न पार्यते । प्रोफेसरपदधारि जैकोबीनापि शोधनीयपत्रणा-(द्युपकृ)-शो-

धनसूचनाप्रदानादिनोपकृताः । अतस्तदपि कृतज्ञतया स्मृतिपथमुपनीयते ऽङ्कनावसरे । यैस्तावत्स्वकीयानि पुस्तकानि प्रदत्तानि तेऽप्युपकर्तार एव । पुरुषधर्मत्वाद्भ्रान्तेस्तथाज्ञानदोषाच्च यदत्र स्खलितं तत्सुधीभिः क्षन्तव्यमिति पुनः प्रार्थ्य श्रीसंघसमक्षं तत्प्रायोगिकमिच्छामि दुक्कडं दीयते ।

संशोध्याङ्कयिता
प्रेमचंदतनयः
केशवलालः
बी. ए. एल्. एल्. बी.

अहमदाबाद-
नगरम्

दावदावदवदुर्दृषयाग्रहृन्दवारियम्
मोददायि तद्वदेव धर्मवस्तु कर्तरि
द्रव्यभव्यदेशविरतसर्वविरतदुष्कृति-
रमणहन्तृ मोक्षचिह्नकारकाङ्कु ॥ १ ॥

[illegible] Jain Education International
[illegible]

अथ

उमास्वातिवाचककृतश्रावकप्रज्ञप्त्याख्यप्रकरणं

हरिभद्रसूरिविरचितव्याख्यासमेतम् ॥

स्मरणं यस्य सत्त्वानां तीव्रपापौघशान्तये ।
उत्कृष्टगुणरूपाय तस्मै श्रीशान्तये नमः ॥ १ ॥

स्वपरोपकाराय श्रावकप्रज्ञप्त्याख्यप्रकरणस्य व्याख्या प्रस्तूयते । तत्र चादावेवाचार्यः शिष्टसमयप्रतिपालनाय विघ्नविनायकोपशान्तये प्रयोजनादिप्रतिपादनार्थं चेदं गाथासूत्रमुपन्यस्तवान्।

अरहंते वंदित्ता सावगधम्मं दुवालसविहं पि।
वोच्छामि समासेणं गुरूवएसाणुसारेणं ॥ १ ॥

अर्हतो वन्दित्वा श्रावकधर्मं द्वादशविधमपि ।
वक्ष्ये समासेन गुरूपदेशानुसारेण ॥ १ ॥

इह हि शिष्टानामयं समयो यदुत शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्तमानाः सन्त इष्टदेवतानमस्कारपूर्वकं प्रवर्तन्त इत्ययमप्याचार्यो न हि न शिष्ट इत्यतस्तत्समयप्रतिपालनाय, तथा श्रेयांसि बहुविघ्नानि भवन्तीति (उक्तं च

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥)

इदं च प्रकरणं सम्यग्ज्ञानहेतुत्वाच्छ्रेयोभूतं वर्तते अतो माभूद्विघ्न इति विघ्नविनायकोपशान्तये, तथा प्रेक्षापूर्वकारिणः प्रयोजनादिविरहेण न क्वचित्प्रवर्तन्त इत्यतः प्रयोजनादिप्रतिपादनार्थं च, तत्र अरहन्ते वंदित्ता इत्यनेनेष्टदेवतानमस्कारमाह अयमेव विघ्नविनायकोपशमहेतुः सावगधम्ममित्यादिना तु प्रयोजनादित्रयं इति गाथासमुदायार्थः ॥

अवयवार्थस्तु अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तस्तीर्थंकरास्तानर्हतः । वंदित्वा अभिवन्द्य । श्रावका वक्ष्यमाणशब्दार्थाः तेषां धर्मस्तं किंभूतं द्वादश विधाः प्रकारा अस्येति द्वादशविधस्तं द्वादशविधमपि संपूर्णं नाणुव्रताद्येकदेशप्रतिबद्धमिति। वक्ष्येऽभिधास्ये ततश्च यथोदितश्रावकधर्माभिधानमेव प्रयोजनं, स एवाभिधीयमानो ऽभिधेयं, साध्यसाधनलक्षणश्च संबन्धः तत्र साध्यः प्रकरणार्थः साधनमिदमेव वचनरूपापन्नमिति ॥ आह यद्येवं नार्थोऽनेन पूर्वाचार्यैरेव यथोदितश्रावकधर्मस्य ग्रन्थान्तरेष्वभिहितत्वात्, उच्यते,सत्यमभिहितः प्रपञ्चेन,इह तु संक्षेपरुचिसत्त्वानुग्रहार्थं समासेण संक्षेपेन वक्ष्ये । किं स्वमनीषिकया, नेत्याह, गुरूपदेशानुसारेण गृणाति शास्त्रार्थमिति गुरुस्तस्मादुपदेशो गुरूपदेशस्तदनुसारेण तन्नीत्येत्यर्थः ॥

श्रावकधर्मस्य प्रक्रान्तत्वात्तस्य श्रावकानुष्ठातृकत्वाच्छ्रावकशब्दार्थमेव प्रतिपादयति ॥

---

१ श्रावकानुगतत्वात् ।

संपत्तदंसणाई पइदियहं जइजणा सुणेई य ।
सामायारिं परमं जो खलु तं सावगं विन्ति ॥ २ ॥

संप्राप्तदर्शनादिः प्रतिदिवसं यतिजनाच्छृणोत्येव ।
सामाचारीं परमां यः खलु तं श्रावकं ब्रुवते ॥ २॥

संप्राप्तं दर्शनादि येनासौ संप्राप्तदर्शनादिः । दर्शनग्रहणात्सम्य
ग्दृष्टिरादिशब्दादणुव्रतादिपरिग्रहः । अनेन मिथ्यादृष्टेर्व्युदासः । स
इत्थंभूतः प्रतिदिवसं प्रत्यहं यतिजनात्साधुलोकात् शृणोत्येव नि
सामाचारीं परमां । तत्र समाचरणं समाचारः शिष्टाचरितः क्रिया
कलापः तस्य भावो गुणवचनब्राह्मणादिभ्यः कर्मणि ष्यञ् सामा
चार्यं पुनः स्त्रीविवक्षायां पित्गौरादिभ्यश्चेति ङीप् (टाप्) यस्ये
त्यकारलोपः यस्य हल इत्यनेन तद्धितयकारलोपः परगमनं सामा
चारी तां सामाचारीं परमां प्रधानां साधुश्रावकसंबद्धामित्यर्थः
यः खलु य एव शृणोति तं श्रावकं ब्रुवते तं श्रावकं प्रतिपाद
यन्ति भगवन्तस्तीर्थकरगणधराः ॥

ततश्चायं पिण्डार्थः । अभ्युपेतसम्यक्त्वः प्रतिपन्नाणुव्रतोऽपि प्रति
दिवसं यतिभ्यः सकाशात्साधूनामगारिणां च सामाचारीं शृणो
तीति श्रावकः इति ।

सांप्रतं श्रवणगुणान् प्रतिपादयति ।

नयनयसंवेगो खलु नाणावरणखओवसमभावो ।
तत्ताहिगमो य तहा जिणवयणायन्नणस्स गुणा ॥३॥

नवनवसंवेगः खलु ज्ञानावरणक्षयोपशमभावः।
तत्त्वाधिगमश्च तथा जिनवचनाकर्णनस्य गुणाः ॥३॥

नवनवसंवेगः प्रत्यग्रः प्रत्यग्रः संवेगः आर्द्रीतःकरणता मोक्षसुखाभिलाष इत्यन्ये । खलुशब्दः पूरणार्थः संवेगस्य शेषगुणनिबंधनत्वेन प्राधान्यख्यापनार्थो वा। तथा ज्ञानावरणक्षयोपशमभावः ज्ञानावरणक्षयोपशमसत्ता संवेगादेव। तत्त्वाधिगमश्च तत्त्वातत्त्वपरिच्छेदश्च तथा जिनवचनाकर्णनस्य तीर्थकरभाषितश्रवणस्यैते गुणा इति ॥ तीर्थकरभाषिता चासौ सामाचारीति ॥

किं च देहस्वजनवित्तप्रतिबद्धः कश्चिदहृदयो न शृणोतीत्येवामसारताख्यापनाय जिनवचनश्रवणस्य सारतामुपदर्शयन्नाह—.

न वि तं करेइ देहो न य सयणो नेय वित्तसंघाओ ।
जिणवयणसवणजणिया जं संवेगाइया लोए ॥ ४ ॥

नापि तत्करोति देहो न च स्वजनो न च वित्तसंघातः ।
जिनवचनश्रवणजनिता यत्संवेगादयो लोके ॥४॥

नापि तत्करोति देहो न च स्वजनो न च वित्तसंघातः जिनवचनश्रवणजनिता यत्संवेगादयो लोके कुर्वन्ति । तथाह्यशाश्वतः प्रतिक्षणभङ्गुरो देहः शोकायासकारणं क्षणिकसंगमश्च स्वजनः अनिष्टितायासव्यवसायास्पदं[1] च वित्तसंघात इत्यसारता । तीर्थकरभाषिताकर्णनोद्भवाश्च संवेगादयो जातिजराम-

---

१, अनिष्टितासद्व्यवसायास्पद ।

रणरोगशोकाद्युपद्रवमातरहितापवर्गहेतव इति सारता । अतः श्रोतव्यं जिनवचनमिति ॥ अथवा

होइ दढं जणुराओ जिणवयणे परमनिव्वुइकरम्मि ।
सयणाइगोयरो तह सम्मद्दिट्ठिस्स जीवस्स ॥ ५ ॥

भवति दृढमनुरागो जिनवचने परमनिर्वृतिकरे ।
श्रवणादिगोचरः तथा सम्यग्दृष्टेर्जीवस्य ॥ ५ ॥

यद्वा किमनेन निसर्गत एव भवति जायते दृढमत्यर्थमनुरागः प्रीतिविशेषः क्व जिनवचने तीर्थकरभाषिते किंविशिष्टे परमनिर्वृतिकरे उत्कृष्टसमाधिकरणशीले किंगोचरोऽनुरागो भवतीत्यत्राह । श्रवणादिगोचरः श्रवणश्रद्धानानुष्ठानविषय इत्यर्थः । तथा तेन प्रकारेण कस्येत्यत्राह सम्यग्दृष्टेर्जीवस्य प्रक्रान्तत्वाच्छ्रावकस्येत्यर्थः । अतोऽसौ श्रवणे प्रवर्तत एव ततश्च शृणोतीति श्रावक इति युक्तं इति गाथाभिप्रायः ॥

निरूपितः श्रावकशब्दार्थः । सांप्रतं द्वादशविधं श्रावकधर्ममुपन्यस्यन्नाह ।

पञ्चेव अणुव्वयाइं गुणव्वयाइं च हुंति तिन्नेव ।
सिक्खावयाइं चउरो सावगधम्मो दुवालसहा ॥ ६ ॥

पञ्चैवाणुव्रतानि गुणव्रतानि च भवन्ति त्रीण्येव ।
शिक्षाव्रतानि चत्वारि श्रावकधर्मो द्वादशधा ॥ ६ ॥

पञ्चेति सङ्ख्या । एवकारोऽवधारणे । पञ्चैव न चत्वारि षड्वा । अणूनि च तानि व्रतानि चाणुव्रतानि महाव्रतापेक्षया चाणुत्वमिति

स्थूरप्राणातिपातादिविनिवृत्तिरूपाणीत्यर्थः ॥ गुणव्रतानि च भवन्ति त्रीण्येव न न्यूनाधिकानि वा । अणुव्रतानामेवोत्तरगुणभूतानि व्रतानि गुणव्रतानि दिग्व्रतभोगोपभोगपरिमाणकरणानर्थदण्डविरतिलक्षणानि एतानि च भवन्ति त्रीण्येव । शिक्षापदानि च शिक्षाव्रतानि वा तत्र शिक्षा अभ्यासः स च चारित्रनिबन्धनविशिष्टक्रियाकलापविषयस्तस्य पदानि स्थानानि तद्विषयाणि वा व्रतानि शिक्षाव्रतानि एतानि च चत्वारि सामायिकदेशावकाशिकपौंषधोपवासातिथिसंविभागाख्यानि । एवं श्रावकधर्मो द्वादशधा द्वादशप्रकार इति गाथासमासार्थः । अवयवार्थं तु महता प्रपञ्चेन ग्रन्थकार एव वक्ष्यति ॥ तथा चाह—

एयस्स मूलवत्थू सम्मत्तं तं च गंठिभेयम्मि ।
खयउवसमाइ तिविहं सुहायपरिणामरुवं तु ॥ ७ ॥

एतस्य मूलवस्तु सम्यक्त्वं तच्च ग्रन्थिभेदे ।
क्षायोपशमिकादि त्रिविधं शुभात्मपरिणामरूपं तु ॥७॥

एतस्यानन्तरोपन्यस्तस्य श्रावकधर्मस्य मूलवस्तु सम्यक्त्वं । वसन्त्यस्मिन्नणुव्रतादयो गुणास्तद्भावभावित्वेनेति वस्तु । मूलभूतं च तद्वस्तु च मूलवस्तु किं तत्सम्यक्त्वम् । उक्तं च

मूलं द्वारं प्रतिष्ठानमाधारो भाजनं निधिः ।
द्विपदीत्यस्य धर्मस्य सम्यक्त्वं परिकीर्तितम् ॥ १ ॥

तच्च सम्यक्त्वं ग्रन्थिभेदे वक्ष्यमाणलक्षणकर्मग्रन्थिभेदे(३१-३३) सति भवति नान्यथेति भावः । तच्च क्षायोपशमिकादिभेदात्त्रिविधं

क्षायोपशमिकमौपशमिकं क्षायिकं च । यद्वा कारकादिशुभात्मपरिणामरूपं तु शुभः संक्लेशवर्जित आत्मपरिणामो जीवधर्मो रूपं यस्य तच्छुभात्मपरिणामरूपं सुखधारणे शुभात्मपरिणामरूपमेव । अनेन तद्व्यतिरिक्तलिङ्गादिधर्मव्यवच्छेदमाह । व्यतिरिक्तधर्मत्वे तत उपकारायोगादिति ॥

जं जीवकम्मजोए जुज्जइ एयं अओ तयं पुव्विं ।
वोच्छं तओ कमेणं पच्छा तिविहं पि सम्मत्तं ॥८॥

यतो जीवकर्मयोगे युज्यते एतदतः तकं पूर्वम् ।
वक्ष्ये ततः क्रमेण पश्चात्त्रिविधमपि सम्यक्त्वम् ॥ ८ ॥

यतो यस्मात्कारणाज्जीवकर्मयोगे जीवकर्मसंबन्धे सति युज्यते एतत् घटते इदं सम्यक्त्वं कर्मक्षयोपशमादिरूपत्वात् अतोऽस्मात्कारणात्तकं जीवकर्मयोगं पूर्वमादौ वक्ष्ये ऽभिधास्ये । ततस्तदुत्तरकालं क्रमेण परिपाट्या पश्चात्त्रिविधमपि क्षायोपशमिकादि सम्यक्त्वं यस्य इति ॥ तत्राह

जीवो अणाइनिहणो नाणावरणाइकम्मसंजुत्तो ।
मिच्छत्ताइनिमित्तं कम्मं पुण होइ अट्ठविहं ॥ ९ ॥

जीवो ऽनादिनिधनो ज्ञानावरणादिकर्मसंयुक्तः ।
मिथ्यात्वादिनिमित्तं कर्म पुनर्भवत्यष्टविधम् ॥ ९ ॥

जीवतीति जीवः । असौ अनादिनिधनः अनाद्यपर्यवसित इत्यर्थः । स च ज्ञानावरणादिकर्मणा समेकीभावेनान्योन्यप्रवाहत्वा

युक्तः संबद्धो ज्ञानावरणादिकर्मसंयुक्तः । मिथ्यात्वादिनिमित्तं मिथ्यात्वादिकारणं मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतव इति वचनात् (तत्त्वार्थाधिगमसूत्रम् ८-१) कर्म पुनर्ज्ञानावरणादि भवत्यष्टविधमष्टप्रकारमिति ॥ तथा चाह

पढमं नाणावरणं बीयं पुण होइ दंसणावरणं।
तइयं च वेयणीयं तहा चउत्थं च मोहणियं ॥ १० ॥

प्रथमं ज्ञानावरणं द्वितीयं पुनर्भवति दर्शनावरणम् ।
तृतीयं च वेदनीयं तथा चतुर्थं च मोहनीयम् ॥ १० ॥

प्रथममाद्यं ज्ञानावरणं आव्रियतेऽनेनावृणोतीति वावरणं ज्ञानस्यावरणं ज्ञानावरणं ज्ञानं मतिज्ञानादि । द्वितीयं पुनर्भवति दर्शनावरणं पुनःशब्दो विशेषणार्थः सामान्यावबोधावारकत्वात् दर्शनं चक्षुर्दर्शनादि। तृतीयं च वेदनीयं सातासातरूपेण वेद्यत इति वेदनीयं रूढशब्दात्पङ्कजादिवत् । तथा चतुर्थं कर्म किं अत आह मोहनीयं मोहयतीति मोहनीयं मिथ्यात्वादिरूपत्वादिति ।

आऊअ नामं गोयं चरमं पुण अंतराइयं होइ।
मूलपयडीउ एया उत्तरपयडी अओ वुच्छं ॥ ११ ॥

आयुष्कं नाम गोत्रं चरमं पुनरन्तरायिकं भवति ।
मूलप्रकृतय एता उत्तरप्रकृतीरतो वक्ष्ये ॥ ११ ॥

आयुष्कं नाम गोत्रं । तत्रैति याति वेत्यायुरननुभूतमेत्यनुभूतं च यातीत्यर्थः सर्वमपि कर्मैवंभूतं तथापि प्रक्रान्तभवप्रबन्धावि-

च्छेदादायुष्कमेव गृह्यते अस्ति च विच्छेदो मिथ्यात्वादिषु । तथा गत्यादिशुभाशुभनमनान्नामयतीति नाम । तथा गां वाचं त्रायत इति गोत्रं रूढिषु हि क्रिया कर्मव्युत्पत्त्यर्था नार्थक्रियार्था इत्युच्चैर्भावादिनिबन्धनमदुष्टमित्यर्थः । चरमं पुनः पर्यन्तवर्ति तत्पुनरन्तरायं भवति दानादिविघ्नोऽन्तरायस्तत्कारणमन्तरायमिति । मूलप्रकृतय एताः सामान्यप्रकृतय इत्यर्थः उत्तरप्रकृतीरेतद्विशेषरूपा अतो वक्ष्ये अत ऊर्ध्वमभिधास्य इति ॥ क्रमप्रयोजनं प्रथमगुणघातादि यथा कर्मप्रकृतिसंग्रहण्यामुक्तं तथैव द्रष्टव्यं ग्रन्थविस्तरभयाद्वस्तुतोऽप्रक्रान्तत्वाच्च न लिखितमिति । तथा

पढमं पंचवियप्पं मइसुयओहिमणकेवलावरणं ।
बीयं च नववियप्पं निद्दापण दंसणचउक्कं ॥ १२ ॥

प्रथमं पञ्चविकल्पं मतिश्रुतावधिमनःकेवलावरणम् ।
द्वितीयं च नवविकल्पं निद्रापञ्चकं दर्शनचतुष्कम् ॥१२॥

इह सूत्रक्रमप्रामाण्यात्प्रथममाद्यं ज्ञानावरणं पञ्चविकल्पमिति पञ्चभेदं । तानेव भेदानाह । मतिश्रुतावधिमनःकेवलावरणं मतिज्ञानाद्यावरणमित्यर्थः । द्वितीयं च दर्शनावरणं नवविकल्पं निद्रापञ्चकं दर्शनचतुष्कं चेति । निद्रापञ्चकमाह ।

निद्दा निद्दानिद्दा पयला तह होइ पयलपयला य ।
थीणद्धी अ सुरुद्दा निद्दापणगं जिणाभिहियं ॥१३॥

निद्रा निद्रानिद्रा प्रचला तथा भवति प्रचलाप्रचला च ।
स्त्यानर्द्धिश्च सुरुद्रा निद्रापञ्चकं जिनाभिहितम् ॥ १३ ॥

निद्रादीनां स्वरूपम् ।

थीणगिद्धीओ निद्दा पुणपडिबोहा य निद्दनिद्दा य ।
पयला होइ ठियस्स उ पयलापयला य चंकमओ ॥
अहमंकिलिट्ठकम्माणुवेयणे होइ थीणगिद्धी उ ।
महनिद्दा दिणनिग्गयगायारुम्माहणी पायम् ॥

अत्रेत्यंभूतनिद्रादिकारणं कर्म अनन्तरं दर्शनविघातित्वाद्दर्शनावरणं प्राह्यमिति । दर्शनचतुष्टयमाह ।

नयणेयरोहिकेवल दंसणवरणं चउव्विहं होइ।
सायासाय दुभेयं च वेयणिज्जं मुणेयव्वं ॥ १४ ॥

नयनेतरावधिकेवलदर्शनावरणं चतुर्विधं भवति ।
सातासातद्विभेदं च वेदनीयं मुणितव्यम् ॥ १४ ॥

नयनेतरावधिकेवलदर्शनावरणं चतुर्विधं भवति । आवरणशब्दः प्रत्येकमभिसंबध्यते । नयनं लोचनं चक्षुरिति पर्यायाः ततश्च नयनदर्शनावरणं चक्षुर्दर्शनावरणं वेति चक्षुःसामान्योपयोगावरणमित्यर्थः । इतरग्रहणादचक्षुर्दर्शनावरणं शेपेन्द्रियदर्शनावरणमिति । एवमवधिकेवलयोरपि योजनीयं ॥ सातासातद्विभेदं च वेदनीयं मुणितव्यं । सातवेदनीयमसातवेदनीयं च । आल्हादरूपेण यद्वेद्यते तत्सातवेदनीयं । परितापरूपेण यद्वेद्यते तदसातवेदनीयं । मुणितव्यं ज्ञातव्यमिति ॥

दुविहं च मोहणियं दंसणमोहं चरित्तमोहं च ।
दंसणमोहं तिविहं सम्मेयरमीसवेयणियं ॥ १५ ॥

द्विविधं च मोहनीयं दर्शनमोहनीयं चारित्रमोहनीयं च ।
दर्शनमोहनीयं त्रिविधं सम्यक्त्वेतरमिश्रवेदनीयम् ॥१५॥

द्वे विधेऽस्य तद्द्विविधं द्विप्रकारं । चः समुच्चये । मोहनीयं प्राङ्निरूपितशब्दार्थं । द्वैविध्यमेवाह । दर्शनमोहनीयं चारित्रमोहनीयं च । तत्र दर्शनं सम्यग्दर्शनं तन्मोहयतीति दर्शनमोहनीयं । चारित्रं विरतिरूपं तन्मोहयतीति चारित्रमोहनीयं । तत्र दर्शनमोहनीयं त्रिविधं त्रिप्रकारं सम्यक्त्वेतरमिश्रवेदनीयं । सम्यक्त्वरूपेण वेद्यते यत्तत्सम्यक्त्ववेदनीयं । इतरग्रहणान्मिथ्यात्वरूपेण वेद्यते यत्तन्मिथ्यात्ववेदनीयं । मिश्रग्रहणात्सम्यग्मिथ्यात्वरूपेण वेद्यते यत्तत्सम्यक्त्वमिथ्यात्ववेदनीयं । एवमयं वेदनीयशब्दः प्रत्येकमभिसंबध्यते । इदं च बन्धं प्रत्येकविधमेव सत्कर्मतया त्रिविधमिति ॥ आह । सम्यक्त्ववेदनीयं कथं दर्शनमोहनीयं न हि तद्दर्शनं मोहयति तस्यैव दर्शनत्वात् । उच्यते मिथ्यात्वप्रकृतित्वादतिचारसंभवादौपशमिकादिमोहनाच्च दर्शनमोहनीयमिति ॥

दुविहं चरित्तमोहं कसाय तह नोकसाय वेयणियं ।
सोलसनवभेयं पुण जहासंखं मुणेयव्वं ॥ १६ ॥

द्विविधं चारित्रमोहनीयं कषायवेदनीयं तथा नोकषायवेदनीयं । षोडशनवभेदं पुनर्यथासंख्यं मुणितव्यं ॥ १६ ॥

द्विविधं द्विप्रकारं चारित्रमोहनीयं प्राङ्निरूपितशब्दार्थं । कषायवेदनीयं तथा नोकषायवेदनीयं चेति । वेदनीयशब्दः प्रत्येकमभिसंबध्यते । तत्र क्रोधादिकषायरूपेण यद्वेद्यते तत्कषायवेदनीयं ।

तथा स्त्रीवेदादिनोकषायरूपेण यद्वेद्यते तन्नोकषायवेदनीयं । अस्यैव भेदानाह ॥ षोडश नवभेदं पुनर्यथासङ्ख्येन मुणितव्यं । षोडशभेदं कषायवेदनीयं । नवभेदं नोकषायवेदनीयं । भेदाननन्तरं वक्ष्यत्येवेति ॥ तत्र कषायभेदानाह ।

अण अप्पच्चक्काणा पच्चक्काणावरणा य संजलणा ।
कोहमणमायलोहा पत्तेयं चउवियप्पत्ति ॥ १७ ॥

अनन्तानुबन्धिनो ऽप्रत्याख्यानाः प्रत्याख्यानावरणाः च संज्वलनाः ।
क्रोधमानमायालोभाः प्रत्येकं चतुर्विकल्पा इति ॥ १७ ॥

अण इति सूचनात्सूत्रं इति कृत्वा अनन्तानुबन्धिनो गृह्यन्ते इह पारंपर्येणानन्तं भवमनुबद्धुं शीलं येषामिति अनन्तानुबन्धिनः उदयस्थाः सम्यक्त्वविघातिन इति कृत्वा ॥ अविद्यमानप्रत्याख्याना अप्रत्याख्याना देशप्रत्याख्यानं सर्वप्रत्याख्यानं च नैषामुदये लभ्यते इत्यर्थः ॥ प्रत्याख्यानमावृण्वन्ति मर्यादया ईषद्वेति प्रत्याख्यानावरणाः आङ्मर्यादायामीषदर्थे वा मर्यादायां सर्वविरतिमावृण्वन्ति न देशविरतिं ईषदर्थेऽपि ईषद्वृण्वन्ति सर्वविरतिमेव न देशविरतिं देशविरतिश्च भूयसी स्तोकादपि विरतस्य देशविरतिभावात् ॥ चः समुच्चये ॥ ईषत्परीषहादिसन्निपातज्वलनात्संज्वलनाः सम् शब्द ईषदर्थे इति ॥ एवं क्रोधमानमायालोभाः प्रतीतस्वरूपाः प्रत्येकं चतुर्विकल्पा इति । क्रोधोऽनन्तानुबन्ध्यादिभेदाच्चतुर्विकल्पः ॥ एवं मानादयोऽपीति ॥ स्वरूपं चैतेषामित्यमाहुः

जलरेणुपुढविपव्वयराईसरिसो चउव्विहो कोहो।
तिणिसलयाकट्ठट्ठियसेलत्थंभोवमो माणो ॥ १ ॥
मायावलेहिगोमुत्तिमेढसिंगघणंवसमूलसमा ।
लोहो हलिद्दखंजणकद्दमकिमिरागसारिच्छो ॥२॥[कर्मप्र.१-१९-२०]
पक्खचउम्मासवच्छरजावज्जीवाणुगामिणो कमसो ।
देवनरतिरियनारयगतिसाहणहेयवो भणिया ॥ ३ ॥ इति

अधुना नोकषायभेदानाह।

इत्थीपुरिसनपुंसगवेयतिगं चेव होइ नायव्वं ।
हास रइ अरइ भयं सोग दुगंछा य छक्कं ति ॥१८॥

स्त्रीपुरुषनपुंसकवेदत्रिकं चैव भवति ज्ञातव्यम् ।
हास्यं रतिरतिर्भयं शोको जुगुप्सा चैव षट्कमिति ॥ १८ ॥

स्त्रीपुरुषनपुंसकवेदत्रिकं चैव भवति ज्ञातव्यं नोकषायवेद्यत[1]इति भावः । तत्र वेद्यत इति वेदः । स्त्रियः स्त्रीवेदोदयात्पुरुषाभिलाषः । पुरुषस्य पुरुषवेदोदयात्स्त्र्यभिलाषः । नपुंसकस्य तु नपुंसकवेदोदयादुभयाभिलाषः । हास्यं रतिः अरतिर्भयं शोको जुगुप्सा चैव षट्कमिति । तत्र सनिमित्तमनिमित्तं वा हास्यं प्रतीतमेव । बाह्याभ्यन्तरेषु वस्तुषु प्रीतिः रतिः । एतेष्वेवाप्रीतिररतिः । भयं त्रासः । परिदेवनादिलिङ्गं शोकः । चेतनाचेतनेषु वस्तुषु व्यलीककरणं जुगुप्सा । यदुदयादेते हास्यादयो भवन्ति ते नोकषायाख्या मोहनीयकर्मभेदा इति भावः । नोकषायता चैतेषामाद्यकषायत्रयविकल्पानुवर्तित्वेन । तथाहि न क्षीणेषु द्वादशस्वमीषां भाव इति ॥

---

१ नोकषायवेदयंति ।

आउं च एत्थ कम्मं चउव्विहं नवरं होइ नायव्वं ।
नारयतिरियनरामरगइभेयविभागओ भणिअं ॥१९

आयुष्कं च अत्र कर्म चतुर्विधं नवरं भवति ज्ञातव्यम्
नारकतिर्यङ्नरामरगतिभेदविभागतो भणितम् ॥ १९ ।

आयुष्कं च प्राङ्निरूपितशब्दार्थं अत्र प्रक्रमे क्रियत इति क
चतुर्विधं चतुःप्रकारं भवति ज्ञातव्यं । नवरमिति निपातः स्व
गतानेकभेदप्रदर्शनार्थः । चातुर्विध्यमेवाह । नारकतिर्यङ्नरामर
तिभेदविभागतो गतिभेदविभागेन भणितमुक्तं तीर्थकरगणधरै
तद्यथा नारकायुष्कं तिर्यगायुष्कं मनुष्यायुष्कं देवायुष्कमिति ॥

नामं दुचत्तभेयं गइजाइसरीरअंगुवंगे य ।
बंधणसंघायणसंघयणसंठाणनामं च ॥ २० ॥

नाम द्विचत्वारिंशत्भेदं गतिजातिशरीराङ्गोपाङ्गानि च ।
बन्धनसंघातनसंहननसंस्थाननाम च ॥ २० ॥

नाम प्रागभिहितशब्दार्थं द्विचत्वारिंशत्प्रकारं । भेदानाह । ग
तिनाम यदुदयान्नरकादिगतिगमनं । जातिनाम यदुदयादेकेन्द्रिया
दिजात्युत्पत्तिः आह स्पर्शनादीन्द्रियावरणक्षयोपशमसद्भावादेके
न्द्रियादित्वं नाम चौदयिको भावः तत्कथमेतदिति उच्यते तदुपयो
गादिहेतुः क्षयोपशम एकेन्द्रियादि संज्ञानिबन्धनं च नामेति न
दोषः । शरीरनाम यदुदयादौदारिकादिशरीरभावः । अङ्गोपाङ्ग
नाम यदुदयादङ्गोपाङ्गनिवृत्तिः शिरःप्रभृतीन्यङ्गानि श्रोत्रादीन्य
ङ्गोपाङ्गानि । उक्तं च

सीसमुरोदरपिट्ठी दो बाहू ऊरुभयाय भट्ठंगा।
अंगुलिमाइ उवंगा अंगोवंगाइं सेसाइं ॥ १ ॥

बन्धननाम यत्सर्वात्मप्रदेशैर्गृहीतानां गृह्यमाणानां च पुद्गलानां संबन्धजनकं अन्यशरीरपुद्गलैर्वा जतुकल्पमिति। संघातननाम यदुदयादौदारिकादिशरीरयोग्यपुद्गलग्रहणे शरीररचना भवति। संहननानाम यद्वज्रऋषभनाराचादिसंहनननिमित्तं। संस्थाननाम समचतुरस्रादिसंस्थानकारणं। चः समुच्चय इति गाथार्थः ॥

तह वन्नगंधरसफासनामगुरुलहू य बोद्धव्वं।
उवघायपरापायाणुपुव्विऊसासनामं च ॥ २१ ॥

तथा वर्णगन्धरसस्पर्शनामागुरुलघु च बोद्धव्यम्।
उपघातपराघातानुपूर्व्युच्छ्वासनाम च ॥ २१ ॥

तथा वर्णनाम यदुदयात्कृष्णादिवर्णनिवृत्तिः। एवं गन्धरसस्पर्शेष्वपि स्वभेदापेक्षया भावनीयमिति। अगुरुलघु च बोद्धव्यं अत्रानुस्वारदीर्घत्वेऽलाक्षणिके मुखोच्चारणार्थे तूपन्यस्ते तत्रागुरुलघुनाम यदुदयान्न गुरुर्नापि लघुर्भवति देह इति एकान्ततदभावे[1] सदा निमज्जनोर्ध्वगमनप्रसंगः। उपघातनाम यदुदयादुपहन्यते। पराघातनाम यदुदयात्परानाहन्ति। आनुपूर्वीनाम यदुदयादपान्तरालगतौ नियतदेशमनुश्रेणिगमनं, नियत एवाङ्गविन्यास इत्यन्ये। उच्छ्वासनाम यदुदयादुच्छ्वासनिःश्वासौ भवतः आह यद्येवं पर्याप्तिनाम्नः कोपयोग इति उच्यते पर्याप्तिः करणशक्तिः उच्छ्वासनामवत एव तन्निवृत्तौ सहकारिकारणं इयु-

१ एकान्ततद्भावे।

क्षेपणशक्तिमतो धनुर्ग्रहणशक्तिवत् । एवमन्यत्रापि भिन्नविषयता सूक्ष्मधियावसेया । चः समुच्चये इति ।

आयवउज्जोयविहायगई य तसथावराभिहाणं च ।
बायरसहुमं पज्जत्तापज्जत्तं च नायव्वं ॥ २२ ॥

आतपोद्योतविहायोगति त्रसस्थावराभिधानं च ।
बादरसूक्ष्मपर्याप्तापर्याप्तं च ज्ञातव्यं ॥ २२ ॥

आतपनाम यदुदयादातपवान्भवति पृथिवीकायं आदित्यमण्डलादिवत् । उद्योतनाम यदुदयादुद्योतवान्भवति खद्योतकादिवत् । विहायोगतिनाम यदुदयाच्चंक्रमणं इदं च द्विविधं प्रशस्ताप्रशस्तभेदात् प्रशस्तं हंसगजादीनां अप्रशस्तमुष्ट्रादीनामिति । त्रसनाम यदुदयाच्चलनं स्पन्दनं च भवति त्रसत्वमेवान्ये । स्थावराभिधानं चेति स्थावरनाम यदुदयादस्पन्दनो भवति स्थावर एवान्ये । चः समुच्चये । बादरनाम यदुदयाद्बादरो भवति स्थूर इत्यर्थः इन्द्रियगम्य इत्यन्ये । सूक्ष्मनाम यदुदयात्सूक्ष्मो भवति अत्यन्तश्लक्ष्णः अतीन्द्रिय इत्यर्थः । पर्याप्तकनाम यदुदयादिन्द्रियादिनिष्पत्तिर्भवति । अपर्याप्तकनाम उक्तविपरीतं यदुदयात्संपूर्णपर्याप्त्यनिवृत्तिर्न त्वाहारशरीरेन्द्रियपर्याप्त्यनिवृत्तिरपि यस्मादागामिभवायुष्कं बध्वा म्रियंते सर्व एव देहिनः तच्चाहारशरीरेन्द्रियपर्याप्त्या पर्याप्तानामेव बध्यत इति ।

पत्तेयं साहारण-थिरमथिरसुहासुहं च नायव्वं ।
सूभगदूभगनामं सूसर तह दूसरं चेव ॥ २३ ॥

प्रत्येकं साधारणं स्थिरमस्थिरं शुभाशुभं च ज्ञातव्यम्।
सुभगदुर्भगनाम सुस्वरं तथा दुःस्वरं चैव ॥ २३ ॥

प्रत्येकनाम यदुदयादेको जीव एकमेव शरीरं निवर्तयति। साधारणनाम यदुदयाद्बहवो जीवा एकं शरीरं निवर्तयंति। स्थिरनाम यदुदयाच्छरीरावयवानां शिरोऽस्थिदन्तादीनां स्थिरता भवति। अस्थिरनाम यदुदयात्तदवयवानामेव चलता भवति कर्णजिह्वादीनां। शुभाशुभं च ज्ञातव्यं। तत्र शुभनाम यदुदयाच्छरीरावयवानां शुभता यथा शिरसः विपरीतमशुभनाम यथा पादयोस्तथा शिरसा स्पृष्टस्तुष्यति पादाहतस्तु रुष्यति, कामिनीव्यवहारे व्यभिचार इति चेत् न, तस्य मोहनीयनिबन्धनत्वात् वस्तुस्थितिश्चेह चिन्त्यत इति। सुभगनाम यदुदयात्कान्तो भवति। तद्विपरीतं च दुर्भगनामेति। सुस्वरनाम यदुदयात्सौस्वर्यं भवति श्रोतुः प्रीतिहेतुः। तथा दुःस्वरं चैवेति सुस्वरनामोक्तविपरीतमिति॥

आइज्जमणाइज्जं जसकित्तीनाममजसकित्ती य।
निम्माणनाममउलं चरमं तित्थयरनामं च ॥२४॥

आदेयमनादेयं यशःकीर्तिनाम अयशःकीर्ति च।
निर्माणनाम अतुलं चरमं तीर्थकरनाम च ॥ २४ ॥

आदेयनाम यदुदयादादेयो भवति यच्चेष्टते भाषते वा तत्सर्वं लोकः प्रमाणीकरोति[1] तद्विपरीतमनादेयं। यशःकीर्तिनाम यदुदयाद्यशःकीर्तिभाजः यशःकीर्त्योर्विशेषः दानपुण्यफला कीर्तिः

---

१ प्रमाणं करोति

क्षेपणशक्तिमतो धनुर्ग्रहणशक्तिवत् । एवमन्यत्रापि भिन्नविषयतां सूक्ष्मधियावसेया । चः समुच्चये इति ।

आयवउज्जोयविहायगई य तसथावराभिहाणं च ।
बायरसहुमं पज्जत्तापज्जत्तं च नायव्वं ॥ २२ ॥

आतपोद्योतविहायोगति त्रसस्थावराभिधानं च ।
बादरसूक्ष्मपर्याप्तापर्याप्तं च ज्ञातव्यं ॥ २२ ॥

आतपनाम यदुदयादातपवान्भवति पृथिवीकाये आदित्यमण्डलादिवत् । उद्योतनाम यदुदयादुद्योतवान्भवति खद्योतकादिवत् । विहायोगतिनाम यदुदयाच्चंक्रमणं इदं च द्विविधं प्रशस्ताप्रशस्तभेदात् प्रशस्तं हंसगजादीनां अप्रशस्तमुष्ट्रादीनामिति । त्रसनाम यदुदयाच्चलनं स्पन्दनं च भवति त्रसत्वमेवान्ये । स्थावराभिधानं चेति स्थावरनाम यदुदयादस्पन्दनो भवति स्थावर एवान्ये । चः समुच्चये । बादरनाम यदुदयाद्बादरो भवति स्थूर इत्यर्थः इन्द्रियगम्य इत्यन्ये । सूक्ष्मनाम यदुदयात्सूक्ष्मो भवति अत्यन्तश्लक्ष्णः अतीन्द्रिय इत्यर्थः । पर्याप्तकनाम यदुदयादिन्द्रियादिनिष्पत्तिर्भवति । अपर्याप्तकनाम उक्तविपरीतं यदुदयात्संपूर्णपर्याप्त्यनिवृत्तिर्न त्वाहारशरीरेन्द्रियपर्याप्त्यनिवृत्तिरपि यस्मादागामिभवायुष्कं बध्वा म्रियंते सर्व एव देहिनः तथाहारशरीरेन्द्रियपर्याप्त्या पर्याप्तानामेव बध्यत इति ।

पत्तेयं साहारण-थिरमथिरसुहासुहं च नायव्वं ।
सुभगदुभगनामं सुसर तह दूसरं चेय ॥ २३ ॥

प्रत्येकं साधारणं स्थिरमस्थिरं शुभाशुभं च ज्ञातव्यम्।
सुभगदुर्भगनाम सुस्वरं तथा दुःस्वरं चैव ॥ २३ ॥

प्रत्येकनाम यदुदयादेको जीव एकमेव शरीरं निवर्तयति। साधारणनाम यदुदयाद्बहवो जीवा एकं शरीरं निवर्तयंति। स्थिरनाम यदुदयाच्छरीरावयवानां शिरोऽस्थिदन्तादीनां स्थिरता भवति। अस्थिरनाम यदुदयात्तदवयवानामेव चलता भवति कर्णजिह्वादीनां। शुभाशुभं च ज्ञातव्यं। तत्र शुभनाम यदुदयाच्छरीरावयवानां शुभता यथा शिरसः विपरीतमशुभनाम यथा पादयोस्तथा शिरसा स्पृष्टस्तुष्यति पादाहतस्तु रुष्यति, कामिनीव्यवहारे व्यभिचार इति चेत् न, तस्य मोहनीयनिबन्धनत्वात् परतुस्थितिश्चेह चिन्त्यत इति। सुभगनाम यदुदयात्कान्तो भवति। तद्विपरीतं च दुर्भगनामेति। सुस्वरनाम यदुदयात्सौस्वर्यं भवति श्रोतुः प्रीतिहेतुः। तथा दुःस्वरं चैवेति सुस्वरनामोक्तविपरीतमिति॥

आइज्जमणाइज्जं जसकित्तीनाममजसकित्ती य।
निम्माणनाममउलं चरमं तित्थयरनामं च ॥२४॥

आदेयमनादेयं यशःकीर्तिनाम अयशःकीर्ति च।
निर्माणनाम अतुलं चरमं तीर्थंकरनाम च ॥ २४ ॥

आदेयनाम यदुदयादादेयो भवति यच्चेष्टते भाषते वा तत्सर्वं लोकः प्रमाणीकरोति तद्विपरीतमनादेयं। यशःकीर्तिनाम यदुदयाद्यशःकीर्तिभावः यशःकीर्त्योर्विशेषः दानपुण्यफलं कीर्तिः

---

१ प्रमाण करोति

क्षेपणशक्तिमतो धनुर्मर्दणशक्तिवत् । एवमन्यत्रापि भिन्नविषयता सूक्ष्मधियावसेया । चः समुच्चये इति ।

आयवउज्जोयविहायगई य तसथावराभिहाणं च ।
बायरसुहुमं पज्जत्तापज्जत्तं च नायव्वं ॥ २२ ॥
आतपोद्योतविहायोगति त्रसस्थावराभिधानं च ।
बादरसूक्ष्मपर्याप्तापर्याप्तं च ज्ञातव्यं ॥ २२ ॥

आतपनाम यदुदयादातपवान्भवति पृथिवीकाये आदित्यमण्डलादिवत् । उद्योतनाम यदुदयादुद्योतवान्भवति खद्योतकादिवत् । विहायोगतिनाम यदुदयाच्चंक्रमणं इदं च द्विविधं प्रशस्ताप्रशस्तभेदात् प्रशस्तं हंसगजादीनां अप्रशस्तमुष्ट्रादीनामिति । त्रसनाम यदुदयाच्चलनं स्पन्दनं च भवति त्रसत्वमेवान्ये । स्थावराभिधानं चेति स्थावरनाम यदुदयादस्पन्दनो भवति स्थावर एवान्ये । चः समुच्चये । बादरनाम यदुदयाद्बादरो भवति स्थूर इत्यर्थः इन्द्रियगम्य इत्यन्ये । सूक्ष्मनाम यदुदयात्सूक्ष्मो भवति अत्यन्तश्लक्ष्णः अतीन्द्रिय इत्यर्थः । पर्याप्तकनाम यदुदयादिन्द्रियादिनिष्पत्तिर्भवति । अपर्याप्तकनाम उक्तविपरीतं यदुदयात्संपूर्णपर्याप्त्यनिवृत्तिर्न त्वाहारशरीरेन्द्रियपर्याप्त्यनिवृत्तिरपि यस्मादागामिभवायुष्कं बध्वा म्रियंते सर्व एव देहिनः तच्चाहारशरीरेन्द्रियपर्याप्त्या पर्याप्तानामेव बध्यत इति ।

पत्तेयं साहारण-थिरमथिरसुहासुहं च नायव्वं ।
सुभगदुभगनामं सूसर तह दूसरं चेव ॥ २३ ॥

प्रत्येकं साधारणं स्थिरमस्थिरं शुभाशुभं च ज्ञातव्यम्।
सुभगदुर्भगनाम सुस्वरं तथा दुःस्वरं चैव ॥ २३ ॥

प्रत्येकनाम यदुदयादेको जीव एकमेव शरीरं नियर्तयति। साधारणनाम यदुदयाद्बहवो जीवा एकं शरीरं निवर्तयंति। स्थिरनाम यदुदयाच्छरीरावयवानां शिरोऽस्थिदन्तादीनां स्थिरता भवति। अस्थिरनाम यदुदयात्तदवयवानामेव चलता भवति कर्णजिह्वादीनां। शुभाशुभं च ज्ञातव्यं। तत्र शुभनाम यदुदयाच्छरीरावयवानां शुभता यथा शिरसः विपरीतमशुभनाम यथा पादयोस्तथा शिरसा स्पृष्टस्तुष्यति पादाहतस्तु रुष्यति, कामिनीप्यवहारे व्यभिचार इति चेत् न, तस्य मोहनीयनिबन्धनत्वात् परतुस्थितिश्चेह चिन्त्यत इति। सुभगनाम यदुदयात्कान्तो भवति। तद्विपरीतं च दुर्भगनामेति। सुस्वरनाम यदुदयात्सौस्वर्यं भवति श्रोतुः प्रीतिहेतुः। तथा दुःस्वरे चैवेति सुस्वरनामोक्तविपरीतमिति॥

आइज्जमणाइज्जं जसकित्तीनाममजसकित्ती य।
निम्माणनाममउलं चरमं तित्थयरनामं च ॥२४॥

आदेयमनादेयं यशःकीर्तिनाम अयशःकीर्ति च।
निर्माणनाम अतुलं चरमं तीर्थंकरनाम च ॥ २४ ॥

आदेयनाम यदुदयादादेयो भवति यद्येदृते भाषते वा तत्सर्वं लोकः प्रमाणीकरोति तद्विपरीतमनादेयं। यशःकीर्तिनाम यदुदयाद्यशःकीर्तिभावः यशःकीर्त्योर्विशेषः दानपुण्यफला कीर्तिः

---

१ प्रमाणं करोति।

पराक्रमकृते यशः। अयशःकीर्तिनाम चोक्तविपरीतं। निर्माणनाम यदुदयात्सर्वजीवानां जातौ अङ्गोपाङ्गनिवेशो भवति जातिलिङ्गाकृतिव्यवस्थानियम इत्यन्ये अतुलं प्रधानं। चरमं प्रधानत्वात्सूत्रक्रमप्रामाण्याच्चेति तीर्थकरनाम यदुदयात्सदेवमनुष्यासुरस्य जगतः पूज्यो भवति। चः समुच्चये इति॥

गोयं च दुविहभेयं उच्चागोयं तहेव नीयं च।
चरमं च पंचभेअं पन्नत्तं वीयरागेहिं॥ २५॥
गोत्रं च द्विविधमेदमुच्चैर्गोत्रं तथैव नीचं च।
चरमं च पञ्चभेदं प्रज्ञप्तं वीतरागैः॥ २५॥

गोत्रं प्राङ्निरूपितशब्दार्थं भवति द्विविधं द्विप्रकारं उच्चैर्गोत्रं तथैव नीचं चेति नीचैर्गोत्रं च। तत्रोच्चैर्गोत्रं यदुदयादज्ञानी विरूपोऽपि सत्कुलमात्रादेव पूज्यते। नीचैर्गोत्रं तु यदुदयाज्ज्ञानादियुक्तोऽपि निंद्यते॥ चरमं च पर्यन्तवर्तिं च सूत्रक्रमप्रामाण्यात्पञ्चभेदं पञ्चप्रकारं प्रज्ञप्तं प्ररूपितं वीतरागैरर्हद्भिरिति॥

तं दाणलाभभोगोवभोगविरियंतराइयं जाण।
चित्तं पोग्गलरूवं विन्नेयं सव्वमेवेयं॥ २६॥
तद्दानलाभभोगोपभोगवीर्यान्तरायिकं जानीहि।
चित्रं पुद्गलरूपं विज्ञेयं सर्वमेवेदम्॥ २६॥

तद्दानलाभभोगोपभोगवीर्यान्तरायं जानीहि। तत्र दानान्तरायं यदुदयात्सति दातव्ये प्रतिग्राहके च पात्रविशेषे दानफलं च जा-

नोत्सहते दातुं। लाभान्तरायं तु यदुदयात्सत्यपि प्रसिद्धे दातरि तस्यापि लभ्यस्य भावे याच्ञाकुशलोऽपि न लभते। भोगान्तरायं तु यदुदयात्सति विभवे अन्तरेण विरतिपरिणामं न भुंक्ते भोगान्। एवमुपभोगान्तरायमपि। नवरं भोगोपभोगयोरेवं विशेषः सकृद्भुज्यत इति भोगः आहारमाल्यादिः पुनः पुनरुपभुज्यत इत्युपभोगः भवनवलयादिः। उक्तं च

सकृद् भुज्यन्ति भोगो सो उण आहारकुसुमादीसु।
उवभोगो उ पुणो पुण उवभुज्जइ भुवणवलयादी॥

वीर्यान्तरायं तु यदुदयान्निरुजो बलस्थश्चाल्पवीर्यो भवति। चित्रं पुद्गलरूपं विज्ञेयं सर्वमेवेदं चित्रमनेकरूपं चित्रफलहेतुत्वात, पुद्गलरूपं परमाण्वात्मकं न वासनादिरूपममूर्तमिति, विज्ञेयं ज्ञातव्यं भिन्नालम्बनं पुनःक्रियाभिधानमदुष्टमेव, सर्वेदं ज्ञानावरणादि कर्मेति॥

एयस्स एगपरिणामसंचियस्स उ ठिई समक्खाया।
उक्कोसेयरभेया तमहं वुच्छं समासेणं॥ २७॥

एतस्यैकपरिणामसंचितस्य तु स्थितिः समाख्याता।
उत्कृष्टेतरभेदात्तामहं वक्ष्ये समासेन॥ २७॥

एतस्य चानन्तरोदितस्य कर्मणः एकपरिणामसंचितस्य तुशब्दस्य विशेषणार्थत्वात्प्रायः क्लिष्टैकपरिणामोपात्तस्येत्यर्थः स्थितिः समाख्याता सांसारिकशुभफलदातृत्वेनावस्थानं उक्तमागम इति गम्यते। उत्कृष्टेतरभेदादुत्कृष्टा जघन्या च समाख्यातेति भावः

तां स्थितिमहं वक्ष्ये,ऽहमित्यात्मनिर्देशे, वक्ष्येऽभिधास्ये, समासेन संक्षेपेण न तूत्तरप्रकृतिभेदस्थितिप्रतिपादनप्रपञ्चेनेति ।

आइल्लाणं तिन्हं चरमस्स य तीस कोडिकोडीओ।
अयराण मोहणिज्जस्स सत्तरी होइ विन्नेया ॥ २८ ॥

आद्यानां त्रयाणां चरमस्य च त्रिंशत्कोटिकोट्यः।
अतराणां मोहनीयस्य सप्ततिर्भवति विज्ञेया ॥ २८ ॥

आद्यानां त्रयाणां ज्ञानावरणदर्शनावरणवेदनीयानां चरमस्य च सूत्रक्रमप्रामाण्यात्पर्यन्तवर्तिनोऽन्तरायस्येति त्रिंशत्सागरोपमकोटिकोट्यः अतराणामिति सागरोपमानां मोहनीयस्य सप्ततिर्भवति विज्ञेया सागरोपमकोटिकोट्य इति ॥

नामस्स य गोयस्स य वीसं उक्कोसिया ठिई भणिया।
तित्तीससागराइं परमा आउस्स बोद्धव्वा ॥ २९ ॥

नाम्नः च गोत्रस्य च विंशतिरुत्कृष्टा स्थितिर्भणिता।
त्रयस्त्रिंशत्सागराणि परमा आयुषो बोद्धव्या ॥ २९ ॥

नाम्नश्च गोत्रस्य च विंशतिः सागरोपमकोटिकोट्य इति गम्यते उत्कृष्टा स्थितिर्भणिता सर्वोत्तमा स्थितिः प्रतिपादिता तीर्थकरगणधरैरिति । त्रयस्त्रिंशत्सागरोपमाणि परमा प्रधानायुःकर्मणो बोद्धव्येति ॥

अधुना जघन्यामाह ।

वेयणियस्स य बारस नामगोयाण अट्ठ उ मुहुत्ता।
सेसाण जहन्नठिई भिन्नमुहुत्तं विणिद्दिट्ठा ॥ ३० ॥

वेदनीयस्य च द्वादश नामगोत्रयोरष्ट मुहूर्ताः।
शेषाणां जघन्या स्थितिर्भिन्नमुहूर्तं विनिर्दिष्टा ॥ ३० ॥

वेदनीयस्य कर्मणो जघन्या स्थितिरिति योगः द्वादशमुहूर्ता नामगोत्रकर्मणोरष्टौ मुहूर्ता इत्थं मुहूर्तशब्दः प्रत्येकमभिसंबध्यते। द्विघटिको मुहूर्तः। शेषाणां ज्ञानावरणादीनां जघन्या स्थितिर्भिन्नमुहूर्तं विनिर्दिष्टान्तर्मुहूर्तं प्रतिपादितेति। प्रकृतयोजनायाह।

एवं ठिइयस्स जया पंसणपोलणनिमित्तओ कहवि।
खविया कोडाकोडी सत्ता दूरं पमुत्तूणं ॥ ३१ ॥

एवंस्थितिकस्य यदा घर्षणघूर्णननिमित्ततः कथमपि।
क्षपिताः कोटिकोट्यः सप्तैकां प्रमुच्य ॥३१॥

एवंस्थितेरस्य कर्मणः यदा यस्मिन्काले घर्षणघूर्णननिमित्ततो नानायोनिषु चित्रसुखदुःखानुभवनेनेत्यर्थः कथमपि केनचित्प्रकारेण क्षपिताः प्रलयं नीताः कोटिकोट्यः सप्तैकां ज्ञानावरणादिसंबन्धिन्यः एकां विमुच्य विहायेति।

तीइ वि य घोसमिसे खविए इत्थंतरम्मि जीवस्स।
हवइ हु अभिन्नपुव्वो गंठी एवं जिणा बिंति ॥३२॥

तस्या अपि च स्तोकमात्रे क्षपितेऽत्रान्तरे जीवस्य।
भवति हु अभिन्नपूर्वो ग्रन्थिरेवं जिना ब्रुवते ॥ ३२ ॥

तस्या अपि च सागरोपमकोटिकोट्याः स्तोकमात्रे पल्योपमासङ्ख्येयभागे क्षपितेऽपनीते अत्रान्तरेऽस्मिन्भागे जीवस्यात्मनः भवति अभिन्नपूर्वो हुशब्दस्यावधारणार्थत्वाद्व्यवहितोपन्यासाच्चाभिन्नपूर्व एव ग्रन्थिरिव ग्रन्थिर्दुःखेनोद्वेष्ट्यमानत्वादेवं जिना ब्रुवत एवं तीर्थकराः प्रतिपादयन्तीति। उक्तं च तत्समयज्ञैः।

गंठित्ति सुदुब्भेउ करकडघणरूढगूढगंठिव्व।
जीयस्स कम्मजणिओ घणरागद्दोसपरिणामो॥१॥ इति॥

भिन्नंमि तंमि लाभो जायइ परमपयहेउणो नियमा।
सम्मत्तस्स पुणो तं बंधेण न वोलइ कयाइ॥३३॥

भिन्ने तस्मिन् लाभो जायते परमपदहेतोर्नियमात्।
सम्यक्त्वस्य पुनस्तं बन्धेन न व्यवलीयते कदाचित्३३॥

भिन्नेऽपूर्वकरणेन विदारिते तस्मिन् ग्रन्थावात्मनि लाभः प्राप्तिर्जायते संपद्यते परमपदहेतोर्मोक्षकारणस्य नियमान्नियमेनावश्यंभावतयेत्यर्थः कस्य सम्यक्त्वस्य वक्ष्यमाणस्वरूपस्य। पुनस्तं ग्रन्थिमवाप्तसम्यग्दर्शनः सन् बन्धेन कर्मबन्धेन न व्यवलीयते नातिक्रामयति कदाचित्कस्मिंश्चित्काले न ह्यसावुत्कृष्टस्थितीनि कर्माणि बध्नाति तथाविधपरिणामाभावादिति॥ अत्राह

तं जाविह संपत्ती न जुज्जए तस्स निग्गुणत्तणओ।
बहुतरबंधाओ खलु सुत्तविरोहा जओ भणियं॥३४॥

तं यावदिह संप्राप्तिर्न युज्यते तस्य निर्गुणत्वात्।
बहुतरबन्धात्खलु सूत्रविरोधात् यतो भणितम्॥ ३४॥

तं ग्रन्थिं यावदिह विचारे संप्राप्तिर्न युज्यते न घटते। कुतस्तस्य निर्गुणत्वात्तस्य जीवस्य सम्यग्दर्शनादिगुणरहितत्वात्। निर्गुणस्य च बहुतरबन्धात् खलुशब्दोऽवधारणे बहुतरबन्धादेव। इत्थं चैतदङ्गीकर्तव्यं। सूत्रविरोधादन्यथा सूत्रविरोध इत्यर्थः। कथमिति। आह। यतो भणितं यस्मादुक्तमिति। किमुक्तमिति। आह

पल्ले महइमहल्ले कुंभं पक्खिवइ सोहए नालिं।
अस्संजए अविरए बहु बंधइ निज्जरे थोवं॥ ३५॥

पल्येऽतिशयमहति कुम्भं प्रक्षिपति शोभयति नालिम्।
असंयतोऽविरतो बहु बध्नाति निर्जरयति स्तोकं॥ ३६॥

पल्यवत्पल्यस्तस्मिन् पल्ये महति महले अतिशयमहति कुम्भं लाटदेशप्रसिद्धमानरूपं धान्यस्येति गम्यते प्रक्षिपति स्थापयति शोभयति नालिं गृह्णाति संमितकम्। एष दृष्टान्तो उदयमधोपनयः। योऽसंयतः सकलसम्यक्त्वादिगुणस्थानेष्वसंयतत्वान्निष्पन्नाद्दृष्टिः परिगृह्यते अविरतः बाह्यकायादेरप्रनिवृत्तो बहु बध्नाति निर्जरयति स्तोकं स्तोकतरं करोति निर्गुणत्वात्। गुणनिबन्धना हि विशिष्टनिर्जरेति॥

पल्ले महइमहल्ले कुंभं सोहेइ पक्खिवे नालिं॥
जे संजए पमत्ते बहु निज्जरे बंधए थोवं॥ ३६॥

पल्लेऽतिशयमहति कुम्भं सोधयति प्रक्षिपति नालिम्।
यः संयतः प्रमत्तो बहु निर्जरयति बध्नाति स्तोकम्॥३६॥

पल्ले अतिशयमहति कुम्भं सोधयति प्रक्षिपति नालिं। एष दृष्टान्तो ऽयमर्थोपनयः। यः संयतः सम्यग्दृष्टिरीषत्प्रमादवान् प्रमत्तसंयत एव नान्ये बहु निर्जरयति बध्नाति स्तोकं सगुणत्वादिति॥

पल्ले महइमहल्ले कुंभं सोहेइ पक्खिवइ न किंचि॥
जे संजए अपमत्ते बहु निज्जर बंधइ न किंचि॥३७॥

पल्लेऽतिशयमहति कुम्भं सोधयति प्रक्षिपति न किंचित्
यः संयतोऽप्रमत्तो बहु निर्जरयति बध्नाति न किंचित्३७

पल्ले ऽतिशयमहति कुम्भं सोधयति प्रक्षिपति न किंचित्। एष दृष्टान्तो ऽयमर्थोपनयः। यः संयतो ऽप्रमत्तः प्रमादरहितः साधुरित्यर्थः बहु निर्जरयति बध्नाति न किंचिद्विशिष्टतरगुणत्वात् बन्धकारणाभावादिति। गुरुराह॥

एयमिह ओहविसयं भणियं सव्वे न एवमेवंति॥
अस्संजओ उ एवं पडुच्च ओसन्नभावं तु॥ ३८॥

एतदिह ओघविषयं भणितं सर्वे न एवमेवेति।
असंयतस्त्वेवं प्रतीत्य ओसन्नभावं तु॥ ३८॥

एतदिति पल्ले महइमहल्ले इत्यादि इहास्मिन्विचारे ओघविषयं सामान्यविषयं भणितमुक्तं। सर्वे न एवमेवेति सर्वे नैवमेव बध्न-

न्ति। अस्यैव विषयमुपदर्शयति । अगंयतस्त्वेवं मिथ्यादृष्टिरेव एवं वागति नान्य इति । अगावपि प्रतीत्याङ्गीकृत्य ओघप्रभावं बाहुल्यभावं तुरवधारणे ओसन्नभावमेव न तु नियममिति। नियमे दोषमाह ॥

पावइ बंधाभावो उ अन्नहा पोग्गलाणभावाओ ।
इय वुड्ढिगहणओ ते सव्वे जीवेहि जुज्जंति ॥ ३९ ॥

प्राप्नोति बन्धाभावस्तु अन्यथा पुद्गलानामभावात् ।
इति वृद्धिग्रहणतः ते सर्वे जीवैर्युज्यन्ते ॥ ३९ ॥

प्राप्नोति आपद्यते बन्धाभावस्तु बन्धाभाव एवान्यथान्येन प्रकारेण सर्वे अगंयता एवं वागन्तीत्येवंलक्षणेन । किमित्यत्रोपपत्तिमाह । पुद्गलानामभावाद्ध्यमानानां कर्मपुद्गलानामसंभवात् । तेषामेवाभावे उपपत्तिमाह । इति वृद्धिग्रहणतः एवमनन्तगुणरूपतया वृद्धिग्रहणेन ते कर्मपुद्गलाः सर्वे जीवैर्युज्यन्ते कालान्तरेण सर्वे जीवैः संबध्यन्ते प्रभूततरग्रहणादल्पतरमोक्षाच्च । सहस्रमिव प्रतिदिवसं पञ्चरूपकग्रहणे एकरूपकमोक्षे च दिवसत्रयान्तः पुरुषसतेनेति । आह चोदकः

मोक्खो ऽसंखिज्जाओ कालाओ ते अ जं जिएहिंतो ॥
भणिया णंतगुणा खलु न एस दोसो तओ जुत्तो ॥४०॥

मोक्षोऽसङ्ख्येयात्कालात् ते च यतो जीवेभ्यः ।
भणिता अनन्तगुणाः खलु नैष दोषः ततो युक्तः॥४०॥

मोक्षः परित्यागः असङ्ख्येयात्कालादसङ्ख्येयेन कालेन उत्कृष्टतस्तेषां कर्मपुद्गलानां। तत ऊर्ध्वं कर्मस्थितेः प्रतिषिद्धत्वात्। ते च कर्माणवः यतो यस्माज्जीवेभ्यः सर्वेभ्य एव भणिताः प्रतिपादिता अनन्तगुणाः खलुशब्दस्यावधारणार्थत्वादनन्तगुणा एव। नैष दोषोऽनन्तरोदितो बन्धाभावप्राप्तिकाललक्षणः ततो युक्तो बहुतरबन्धः प्रभूततरग्रहणेऽल्पतरमोक्षे च सत्यपि तेषामनन्तत्वात् स्तोककालाच्च मोक्षादिति। न हि शीर्षप्रहेलिकान्तस्य राशेः प्रतिदिवसं पञ्चरूपकग्रहणे एकरूपकमोक्षे च सति वर्षशतेनापि पुरुषशतेन योगो भवति प्रभूतत्वात्। एवं दार्ष्टान्तिके भावनीयमिति। इत्थं चोदकेनोक्ते सति गुरुराह।

गहणमणंताण न किं जायइ समएण ता कहमदोसो॥
आगम संसाराओ न तहा णंताण गहणं तु॥ ४१॥

ग्रहणमनन्तानां न किं जायते समयेन तत्कथमदोषः।
आगमसंसारान्न तथानन्तानां ग्रहणं तु॥ ४१॥

ग्रहणं कर्मपुद्गलानामादानमनन्तानामत्यन्तप्रभूतानां न किमिति गाथाभङ्गभयाद्व्यत्ययः किं न जायते समयेन, जायत एवेत्यर्थः, समयः परमनिकृष्टः काल उच्यते। यतश्चैवं तत्कथमदोषो दोष एव शीर्षप्रहेलिकान्तस्यापि राशेः प्रतिदिवसं शतभागमात्रग्रहणराशिग्रहणेऽल्पतरमोक्षे च वर्षशतादारत एव पुरुषशतेन योगोपपत्तेः, एवं दार्ष्टान्तिकेऽपि भावना कार्या। स्यादेतदागमसंसारान्न

तथानन्तानां ग्रहणं तु। आगमस्तावत् "जावणं अयं जीवे एयइ वेयइ चलइ फंदइ तावणं अट्ठविहबन्ध एवा सत्तविहबंध एवा छबिहबंध एवा एगविहबंध एवा" इत्यादि संसारस्तु प्रतिसमयबन्धकसत्वसंसृतिरूपैः[1] प्रतीत एव। एवमागमात्संसाराच्च न तथानन्तानां ग्रहणमेव भवति यथा बध्यमानकर्मपुद्गलाभावाद्बन्धाभाव एवेति। एवं पराभिप्रायमाशङ्क्याह।

आगम मुक्खाउ ण किं विसेसविसयत्तणेण सुत्तस्स।
तं जाविह संपत्ती न घडइ तम्हा अदोसो उ॥ ४२॥

आगममोक्षाच्च किं विशेषविषयत्वेन सूत्रस्य।
तं यावदिह संप्राप्तिर्न घटते तस्माददोषस्तु॥ ४२॥

आगममोक्षात्किं न विशेषविषयत्वेन सूत्रस्य पक्षे इत्यादिलक्षणस्य (३५-३७) तं ग्रन्थिं यावदिह विचारे संप्राप्तिर्न घटते। द्वौ प्रतिषेधौ प्रकृतमर्थं गमयत इति कृत्वा घटत एव। तस्माददोषस्तु यस्मादेवं तस्मादेष दोष एव न भवति य उक्तस्तं यावदिह संप्राप्तिर्न युज्यते (३४) इत्यादि। तत्रागमस्तावत् "सम्मत्तंमि उ लद्धे" इत्यादि। मोक्षस्तु प्रकृष्टगुणानुष्ठानपूर्वकः प्रसिद्ध एव। अतो यथोक्तविशेषविषयमेव तत्सूत्रमिति इत्थं चैतदङ्गीकर्तव्यं। अन्यथा तदधिकारोक्तमेव "परिकिवे न किंचि" (३७) इत्येतद्विरुध्यते। अप्रमत्तसंयतस्यापि बन्धकत्वात्। यथोक्तं

"अपमत्तसंजयाणं बंधट्ठिती होइ अट्ठमुहुत्ता।

---

१ प्रतिसमयबन्धकसत्वसंसृतिरूपैः

उक्कोसा उ जहन्ना भिन्नमुहुत्तं तु विन्नेया ॥ १ ॥"
इत्यादि तस्मादोघविषयमेवैतदिति ॥
अवसितमानुषङ्गिकम् । अधुना प्रकृतं सम्यक्त्वमाह

संमत्तं पि य तिविहं खओवसमियं तहोवसमियं च ॥
खइयं च कारगाइ व पन्नत्तं वीयरागेहिं ॥ ४३ ॥

सम्यक्त्वमपि च त्रिविधं क्षायोपशमिकं तथौपशमिकम्
क्षायिकं च कारकादि वा प्रज्ञप्तं वीतरागैः ॥ ४३ ॥

सम्यक्शब्दः प्रशंसार्थः अविरोधार्थो वा तद्भावः सम्यक्त्वं प्रशस्तः मोक्षाविरोधी वात्मधर्म इत्यर्थः । अपि तत्त्रिविधं एतच्चोपाधिभेदात्त्रिप्रकारं । अपिशब्दाच्छ्रावकधर्मस्य प्रकृतत्वात्तच्चारित्रमप्योघतोऽणुव्रतगुणव्रतशिक्षापदभेदात्त्रिविधमेव। चशब्दः स्वगतानेकभेदसमुच्चयार्थः । उक्तं च । "तं च पंचहा सम्मत्तं उवसमं सासायणं खओवसमं वेदयं खइयं" । त्रैविध्यमुपदर्शयति क्षायोपशमिकं तथौपशमिकं क्षायिकं च । कारकादि वा कारकं आदिशब्दाद्रोचकव्यञ्जकपरिग्रहः । एतच्च वक्ष्यत्येवेति न प्रतन्यते । इदं च प्रज्ञप्तं प्ररूपितं वीतरागैरर्हद्भिरिति ॥

सांप्रतं क्षायोपशमिकं सम्यक्त्वमभिधित्सुराह ॥

मिच्छत्तं जमुदिन्नं तं खीणं अणुइयं च उवसंतं ।
मीसीभावपरिणयं वेइज्जंतं खओवसमं ॥ ४४ ॥

मिथ्यात्वं यदुदीर्णं तत्क्षीणं अनुदितं चोपशान्तम् ।
मिश्रीभावपरिणतं वेद्यमानं क्षायोपशमिकम् ॥ ४४ ॥

मिथ्यात्वं नाम मिथ्यात्वमोहनीयं कर्म । तत् यदुदीर्णं यदुद्भूतशक्ति उदयावलिकायां व्यवस्थितमित्यर्थः तत्क्षीणं प्रलयमुपगतं अनुदितं च अनुदीर्णं चोपशान्तं । उपशान्तं नाम विष्कम्भितोदयमपनीतमिथ्यात्वस्वभावं च विष्कम्भितोदयं शोधमिथ्यात्वमपनीतमिथ्यात्वस्वभावं मदनकोद्रवोदाहरणत्रिपुञ्जिन्यायशोधितं सम्यक्त्वमेव ॥ आहेह विष्कम्भितोदयस्य मिथ्यात्वस्यानुदीर्णता युक्ता, न पुनः सम्यक्त्वस्य, विपाकेन वेदनात् । उच्यते । सत्यमेतत्, किं त्वपनीतमिथ्यात्वस्वभावत्वात्स्वरूपेणानुदयात्तस्याप्यनुदीर्णोपचार इति ॥ यद्वानुदीर्णत्वं मिथ्यात्वस्यैव युज्यते न तु सम्यक्त्वस्य । कथं । मिथ्यात्वं यदुदीर्णं तत् क्षीणं अनुदीर्णमुपशान्तं चेति । चशब्दस्य व्यवहितप्रयोगः । ततश्चानुदीर्णं मिथ्यात्वमुपशान्तं च सम्यक्त्वं परिगृह्यते । भावार्थः पूर्ववत् ॥ तदेवं मिश्रीभावपरिणतं क्षयोपशमस्वभावमापन्नं वेद्यमानमनुभूयमानं मिथ्यात्वं प्रदेशानुभवेन सम्यक्त्वं विपाकेन क्षयोपशमाभ्यां निवृत्तमिति कृत्वा क्षायोपशमिकं सम्यक्त्वमुच्यते । आहेदं सम्यक्त्वमौदयिको भावः मोहनीयोदयभेदत्वात् अतोऽयुक्तमस्य क्षायोपशमिकत्वं, न अभिप्रायापरिज्ञानात्सम्यक्त्वं हि सांसिद्धिकमात्मपरिणामरूपं ज्ञानवत् न तु क्रोधादिवत् कर्माणुसंपर्कजं तथाहि तावति मिथ्यात्वघनपटले क्षीणे तथानुभवतोऽपि स्वच्छाभ्रकल्पान् सम्यक्त्वपरमाणून् तथाविधसवितृप्रकाशवत् सहज एवासौ तत्परिणाम इति क्षायोपशमनिष्पन्नश्चायं तमन्तरेणाभावात् न

दुदीर्णक्षयादनुदीर्णोपशमव्यतिरेकेणास्य भावः क्रोधादिपरिणामः पुनरुपधानसामर्थ्यापादितस्फटिकमणिरक्तताबदसहज इति। आह यदि परिणामः सम्यक्त्वं ततो मिश्रीभावपरिणतं वेद्यमानं क्षायोपशमिकमित्येतद्विरुध्यते मोहनीयभेदयोरेव मिश्रीभावपरिणतयोर्वेद्यमानत्वात्, न विरुध्यते तथाविधपरिणामहेतुत्वेन तयोरेव सम्यक्त्वोपचारात्। कृतं विस्तरेणेति।

क्षायोपशमिकानन्तरमौपशमिकमाह।

उवसमगसेढिगयस्स होइ उवसामियं तु सम्मत्तं।
जो वा अकयतिपुंजो अखवियमिच्छो लहइ सम्मं४५

उपशमकश्रेणिगतस्य भवत्यौपशमिकं तु सम्यक्त्वम्।
यो वा अकृतत्रिपुञ्जोऽक्षपितमिथ्यात्वो लभते सम्यक्त्वम्

उपशमकश्रेणिगतस्य औपशमिकीं श्रेणिमनुप्रविष्टस्य भवत्यौपशमिकमेव सम्यक्त्वं तुरवधारणे अनन्तानुबन्धिनां दर्शनमोहनीयस्य चोपशमेन निर्वृत्तमिति कृत्वा औपशमिकं। यो वा अकृतत्रिपुञ्जस्तथाविधपरिणामोपेतत्वात्सम्यङ्मिथ्यात्वोभयानिवर्तितत्रिपुञ्ज एव अक्षपितमिथ्यात्वो ऽक्षीणमिथ्यात्वदर्शनः क्षायिकव्यवच्छेदार्थमेतत् लभते प्राप्नोति सम्यक्त्वं तदप्यौपशमिकमेवेति। अमुमेवार्थं स्पष्टयन्नाह।

खीणंमि उइन्नंमि अ अणुइज्जंते अ सेसमिच्छत्ते॥
अंतोमुहुत्तमित्तं उवसमसम्मं लहइ जीवो॥ ४६॥

क्षीणे उदीर्णे ऽनुदीर्यमाणे च शेषमिथ्यात्वे ।
अन्तर्मुहूर्तमात्रं औपशमिकं सम्यक्त्वं लभते जीवः४६

क्षीण एवोदीर्णे अनुभवेनैव भुक्त इत्यर्थः अनुदीर्यमाणे च मन्दपरिणामतया उदयमगच्छति सति कस्मिन् शेषमिथ्यात्वे विष्कम्भितोदय इत्यर्थः अन्तर्मुहूर्तमात्रं कालं तत ऊर्ध्वं नियामकाभावेन नियमेन मिथ्यात्वप्राप्तेरेतावन्तमेव कालमिति किं औपशमिकं सम्यक्त्वं लभते जीव इति ॥

इदमेव दृष्टान्तेन स्पष्टतरमभिधित्सुराह ॥

ऊसरदेसं दड्ढिल्लयं च विज्झाइ वणदवो पप्प ॥
इय मिच्छस्साणुदए उवसमसम्मं लहइ जीवो ॥४७॥

ऊषरदेशं दग्धं वा विध्यायति वनदवः प्राप्य ।
इय मिथ्यात्वस्यानुदये औपशमिकं सम्यक्त्वं लभते जीवः

ऊषरदेशं ऊषरविभागं ऊषरं नाम यत्र तृणादेरसंभवः दग्धं वा पूर्वमेवाग्निना विध्यायति वनदवो दावानलः प्राप्य । कुतस्तत्र दाह्याभावात् । एष दृष्टान्तोऽयमर्थोपनयः । इय एवं तथाविधपरिणामान्मिथ्यात्वस्यानुदये सति औपशमिकं सम्यक्त्वं लभते जीव इति । वनदवकल्पं ह्यत्र मिथ्यात्वं ऊषरादिदेशस्थानीयं तथाविधपरिणामकण्डकमिति ॥ आह क्षायोपशमिकादस्य को विशेष इति । उच्यते । तत्रोपशान्तस्यापि मिथ्यात्वस्य प्रदेशानुभवोऽस्ति नत्र्योपशमिके । अन्ये तु व्याचक्षते । श्रेणिमध्यवर्तिन्येवौपशमि-

के प्रदेशानुभवो नास्ति न तु द्वितीये तथापि तत्र सम्यक्त्वाप्यनुभवाभाव एव विशेष इति।

औपशमिकानन्तरं क्षायिकमाह॥

खीणे दंसणमोहे तिविहंमि वि भवनियाणभूयंमि।
निप्पच्चवायमउलं सम्मत्तं खाइयं होइ॥ ४८॥

क्षीणे दर्शनमोहनीये त्रिविधेऽपि भवनिदानभूते।
निःप्रत्यपायमतुलं सम्यक्त्वं क्षायिकं भवति॥ ४८॥

क्षपकश्रेणिमनुप्रविष्टस्य सतः क्षीणे दर्शनमोहनीये एकान्तेनैव प्रलयमुपगते त्रिविधेऽपि मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वभेदभिन्ने किं विशिष्टे भवनिदानभूते भवन्त्यस्मिन् कर्मवशवर्तिनः प्राणिन इति भवः संसारस्तत्कारणभूते निःप्रत्यपायं अतिचारापायरहितं अतुलमनन्यसदृशं आसन्नतया मोक्षकारणत्वात् सम्यक्त्वं प्राङ्निरूपितशब्दार्थं क्षायिकं भवति मिथ्यात्वक्षयनिबन्धनत्वात्[1] इति।

क्षायिकानन्तरं कारकाद्याह॥

जं जह भणियं तं तह करेइ सइ जंमि कारगं तं तु।
रोयगसम्मत्तं पुण रुइमित्तकरं मुणेयव्वं॥ ४९॥

यद्यथा भणितं तत्तथा करोति सति यस्मिन् कारकं तत्तु।
रोचकसम्यक्त्वं पुनः रुचिमात्रकरं मुणितव्यं॥ ४९॥

यद्यथा भणितं सूत्रेऽनुष्ठानं तत्तथा करोति सति यस्मिन्सम्यग्दर्शने परमशुद्धिरूपे कारकं तत्तु। कारयतीति कारकं॥ रो-

१ निर्कर्तनत्वा निर्कर्तनत्वात्।

चकसम्यक्त्वं पुनः रुचिमात्रकरं मुणितव्यं विहितानुष्ठाने तथाविधशुद्धभावात्, रोचयतीति रोचकं ॥

सयमिह मिच्छद्दिट्ठी धम्मकहाईहि दीवइ परस्स ।
सम्मत्तमिणं दीवग कारणफलभावओ नेयं ॥ ५० ॥

[स्वयमिह मिथ्यादृष्टिः धर्मकथादिभिर्दीपयति परस्य ।
सम्यक्त्वमिदं दीपकं कारणफलभावतो ज्ञेयं ॥५०॥]

स्वयमिह मिथ्यादृष्टिरभव्यो भव्यो वा कश्चिदङ्गारमर्दकवत् । अथ च धर्मकथादिभिर्धर्मकथया मातृस्थानानुष्ठानेनातिशयेन वा केनचिद्दीपयतीति प्रकाशयति परस्य श्रोतुः सम्यक्त्वमिदं व्यञ्जकं । आह मिथ्यादृष्टेः सम्यक्त्वमिति विरोधः सत्यं किन्तु कारणफलभावतो ज्ञेयं तस्य हि मिथ्यादृष्टेरपि यः परिणामः स खलु प्रतिपत्तृसम्यक्त्वस्य कारणभावं प्रतिपद्यते तद्भावभावित्वात्तस्य, अतः कारणे एव कार्योपचारात्सम्यक्त्वाविरोधः यथायुर्घृतमिति ॥

समस्तस्यैव भावार्थमुपदर्शयति ॥

तद्विहखओवसमओ तेसिमणूणं अभावओ चेव ।
एवं विचित्तरूवं सनिबंधणमो मुणेयव्वं ॥ ५१ ॥

[तद्विधक्षयोपशमतस्तेषामणूनां अभावतश्चैव ।
एवं विचित्ररूपं सनिबन्धनमेव मुणितव्यं ॥ ५१ ॥]

तद्विधक्षयोपशमतस्तेषामणूनां मिथ्यात्वा नामित्यर्थः अभावतश्चैव तेषामेवेति पतते एवं विचित्ररूपं क्षायोपशमिकादिभेदेनेति

भावः। सनिबन्धनमेव सकारणं मुणितव्यं। तथाहि त एव मिथ्यात्वपरमाणवस्तथाविधात्मपरिणामेन क्वचित्तथा शुद्धिमापद्यंते यथा क्षायोपशमिकं सम्यक्त्वं भवति तत्रापि क्वचित्सातिचारं कालापेक्षया क्वचिन्निरतिचारं, अपरे तथा यथौपशमिकं, क्षयादेव क्षायिकमिति ॥

अपरेऽप्यस्य भेदाः संभवन्तीति कृत्वा तानपि सूचयन्नाह ॥

किं चेहुवाहिभेया दसहावीमं परूवियं समए।
ओहेण तंपिमेसिं भेयाणमभिन्नरूवं तु ॥ ५२ ॥

[किं चेहोपाधिभेदात् दशधापीदं प्ररूपितं समये।
ओघेन तदपि अमीषां भेदानामभिन्नरूपं तु ॥ ५२ ॥]

किं चेहोपाधिभेदादाज्ञादिविशेषणभेदादित्यर्थः दशधापीदं दशप्रकारमप्येतत्सम्यक्त्वं प्ररूपितं समये आगमे। यथोक्तं प्रज्ञापनायां

निसग्गुवएसरुई आणरुई सुत्तबीयरुइमेव।
अभिगमवित्थाररुई किरियासंखेवधम्मरुई ॥ १ ॥

आह तदेवेह कस्मान्नोक्तमिति उच्यते ओघेन सामान्येन तदपि दशप्रकारमप्येषां भेदानां क्षायोपशमिकादीनामभिन्नरूपमेव एतेषामेव केनचिद्भेदेन भेदात्। संक्षेपारम्भश्चायं अतो न तेषामभिधानमिति ॥

इदं च सम्यक्त्वमात्मपरिणामरूपत्वाच्छद्मस्थेन दुर्लक्ष्यमिति लक्षणमाह।

तं उवसमसंवेगाइएहि लक्खिज्जई उवाएहिं ।
आयपरिणामरूवं वज्झेहिं पसत्थजोगेहिं ॥ ५३ ॥
[तदुपशमसंवेगादिकैर्लक्ष्यते उपायैः ।
आत्मपरिणामरूपं बाह्यैः प्रशस्तयोगैः ॥ ५३ ॥]

तत्सम्यक्त्वमुपशमसंवेगादिभिरिति उपशान्तिरुपशमः संवेगो मोक्षाभिलाषः आदिशब्दान्निर्वेदानुकम्पास्तिक्यपरिग्रहः लक्ष्यते विदयते एभिरुपशमादिभिर्बाह्यैः प्रशस्तयोगैरिति संबन्धः बाह्यवस्तुविषयत्वाद्बाह्याः प्रशस्तयोगाः शोभनव्यापारास्तैः किं विशिष्टं तत्सम्यक्त्वं आत्मपरिणामरूपं जीवधर्मरूपमिति ॥ तथा चाह

इत्थ य परिणामः खलु जीवस्स सुहो उ होइ विन्नेओ।
किं मलकलंकमुक्कं कणगं भुवि सामलं होइ ॥ ५४ ॥
[अत्र च परिणामः खलु जीवस्य शुभ एव भवति विज्ञेयः ।
किं मलकलङ्कमुक्तं कनकं भुवि श्यामलं भवति ॥५४॥]

अत्र च सम्यक्त्वे सति किं, परिणामोऽध्यवसायः खलुशब्दोऽवधारणार्थः जीवस्य शुभ एव भवति विज्ञेयो न त्वशुभः अथवा किमत्र चित्रमिति । प्रतिवस्तूपमामाह । किं मलकलङ्करहितं कनकं भुवि श्यामलं भवति न भवतीत्यर्थः । एवमत्रापि मलकलंकस्थानीयं प्रभूतं क्लिष्टं कर्म श्यामलत्वतुल्यस्त्वशुभपरिणामः स प्रभूते क्लिष्टे कर्मणि क्षीणे जीवस्य न भवति ॥

प्रशमादीनामेव बाह्ययोगत्वमुपदर्शयन्नाह ।

---

१ श्यामल

पयईइ व कंमाणं वियाणिउं वा विवागमसुहं ति ।
अवरद्धे वि न कुप्पइ उवसमओ सव्वकालं पि ॥५५॥

[प्रकृत्या वा कर्मणां विज्ञाय वा विपाकमशुभमिति ।
अपराद्धेऽपि न कुप्यति उपशमतःसर्वकालमपि॥५५॥]

प्रकृत्या वा सम्यक्त्वाणुवेदकजीवस्वभावेन वा कर्मणां कषायनिबन्धनानां विज्ञाय वा विपाकमशुभमिति । तथाहि कषायाविष्टोऽन्तमुहूर्तेन यत्कर्म बध्नाति तदनेकाभिः सागरोपमकोटाकोटिभिरपि दुःखेन वेदयतीत्यशुभो विपाकः । एतत् ज्ञात्वा किं । अपराद्धेऽपि न कुप्यति अपराध्यत इति अपराद्धयः प्रतिकूलकारी तस्मिन्नपि कोपं न गच्छत्युपशमतः उपशमेन हेतुना सर्वकालमपि यावत्सम्यक्त्वपरिणाम इति ॥ तथा

नरविबुहेसरसुक्खं दुक्खं चिय भावओ य मन्नंतो ।
संवेगओ न मुक्खं मुत्तूणं किंचि पत्थेइ ॥ ५६ ॥

[नरविबुधेश्वरसौख्यं दुःखमेव भावतः च मन्यमानः ।
संवेगतः न मोक्षं मुक्त्वा किंचित् प्रार्थयते ॥ ५६ ॥]

नरविबुधेश्वरसौख्यं चक्रवर्तीन्द्रसौख्यमित्यर्थः अस्वाभाविकत्वात् कर्मजनितत्वात्सावसानत्वाच्च दुःखमेव भावतः परमार्थतो मन्यमानः संवेगतः संवेगेन हेतुना न मोक्षं स्वाभाविकजीवरूपमकर्मजमपर्यवसानं मुक्त्वा किंचित्प्रार्थयतेऽभिलषतीति ।

नारयतिरियनरामरभवेसु निव्वेयओ वसइ दुक्खं।
अकयपरलोयमग्गो ममत्तविसवेगरहिओ वि॥५७॥

[नारकतिर्यङ्नरामरभवेषु निर्वेदतो वसति दुःखम्।
अकृतपरलोकमार्गः ममत्वविषवेगरहितोऽपि॥५७॥]

नारकतिर्यङ्नरामरभवेषु सर्वेष्वेव निर्वेदतो निर्वेदेन कारणेन वसति दुःखं। किंविशिष्टः सन् अकृतपरलोकमार्गः अकृतसदनुष्ठान इत्यर्थः। अयं हि जीवलोके परलोकानुष्ठानमन्तरेण सर्वमेवासारं मन्यते इति। ममत्वविषवेगरहितोऽपि तथा ह्ययं प्रकृत्या निर्ममत्व एव भवति विदिततत्त्वत्वादिति। तथा

दट्ठूण पाणिनिवहं भीमे भवसागरंमि दुक्खत्तं।
अविसेसओ णुकंपं दुहावि सामत्थओ कुणइ॥५८॥

[दृष्ट्वा प्राणिनिवहं भीमे भवसागरे दुःखार्त्तं।
अविशेषतः अनुकम्पां द्विधापि सामर्थ्यतः करोति५८]

दृष्ट्वा प्राणिनिवहं जीवसंघातं क्व भीमे भयानके भवसागरे संसारसमुद्रे दुःखार्त्तं शारीरमानसैर्दुःखैरभिभूतमित्यर्थः अविशेषतः सामान्येनात्मीयेतरविचाराभावेनेत्यर्थः। अनुकम्पां दयां द्विधापि द्रव्यतो भावतश्च द्रव्यतः प्रासुकपिण्डादिदानेन भावतो मार्गयोजनया सामर्थ्यतः स्वशक्त्यनुरूपं करोतीति॥

मन्नइ तमेव सच्चं निस्संकं जं जिणेहि पन्नत्तं।
सुहपरिणामो सम्मं कंखाइविसुत्तियारहिओ॥५९॥

[मन्यते तदेव सत्यं निःशङ्कं यज्जिनैः प्रज्ञप्तं।
शुभपरिणामः सर्वं कांक्षादिविश्रोतसिकारहितः ५९]

मन्यते प्रतिपद्यते तदेव सत्यं निःशङ्कं शङ्कारहितं यज्जिनैः प्रज्ञप्तं यत्तीर्थकरैः प्रतिपादितं शुभपरिणामः सन् साकल्येनानन्तरोदितसमस्तगुणान्वितः। सर्वं समस्तं मन्यते न तु किंचिन्मन्यते किंचिन्नेति भगवत्यविश्वासायोगात्। पुनरपि स एव विशिष्यते। किंविशिष्टः सन्। कांक्षादिविश्रोतसिकारहितः कांक्षा अन्योन्यदर्शनग्राह इत्युच्यते आदिशब्दाद्विचिकित्सापरिग्रहः विश्रोतसिका तु संयमशस्यमङ्गीकृत्याध्यवसायसलिलस्य विश्रोतो गमनमिति, उपसंहरन्नाह॥

एवंविहपरिणामो सम्मद्दिट्ठी जिणेहिं पन्नत्तो।
एसो य भवसमुद्दं लंघइ थोवेण कालेण॥ ६०॥

[एवंविधपरिणामः सम्यग्दृष्टिर्जिनैः प्रज्ञप्तः।
एष च भवसमुद्रं लङ्घयति स्तोकेन कालेन॥ ६०॥]

एवंविधपरिणाम इत्यनन्तरोदितप्रशमादिपरिणामः सम्यग्दृष्टिर्जिनैः प्रज्ञप्त इति प्रकटार्थः। अस्यैव फलमाह। एष च भवसमुद्रं लंघयति अतिक्रामति स्तोकेन कालेन। मासपृथक्त्वादुत्कृष्टतोऽप्यर्धपुद्गलपरावर्तान्तः सिद्धिप्राप्तेरिति।
एवंविधमेव सम्यक्त्वं इत्येतत्प्रतिपादयन्नाह॥

जं मोणं तं सम्मं जं सम्मं तमिह होइ मोणं ति।
निच्चयओ इयरस्स उ सम्मं सम्मेसहऊ वि॥ ६१॥

[यन्मौनं तत्सम्यक् यत्सम्यक् तदिह भवति मौनमिति।
निश्चयतः इतरस्य तु सम्यक्त्वं सम्यक्त्वहेतुरपि ॥६१॥]

मन्यते जगतस्त्रिकालावस्थामिति मुनिः तपस्वी तद्भावो मौनं अविकलं मुनिवृत्तमित्यर्थः। यन्मौनं तत्सम्यक् सम्यक्त्वं यत्सम्यक् सम्यक्त्वं तदिह भवति मौनमिति । उक्तं चाचाराङ्गे ।

जं मोणंति पासहा तं सम्मंति पासहा ।
जं सम्मंति पासहा तं मोणंति पासहा ॥ इत्यादि

निश्चयतः परमार्थेन निश्चयनयमतेनैव एतदेवमिति ।

जो जहवायं न कुणइ मिच्छदिट्ठी तओ हु को अन्नो ।
वड्ढेइ य मिच्छत्तं परस्स संकं जणेमाणो ॥

इत्यादि वचनप्रामाण्यात् । इतरस्य तु व्यवहारनयस्य सम्यक्त्वं सम्यक्त्वहेतुरपि अर्हच्छासनप्रीत्यादि कारणे कार्योपचारात् । एतदपि शुद्धचेतसां पारम्पर्येणापवर्गहेतुरिति । उक्तं च ।

जइ जिणमयं पवज्जह ता मा ववहारनिच्छए मुयह।
ववहारनयउच्छेए तित्थुच्छेओ जओऽवस्सं ॥ इत्यादीनि

वाचकमुख्येनोक्तं "तत्त्वार्थश्रद्धानं सम्यग्दर्शनं" (तत्त्वार्थाधिगमसूत्रम् १-२) । तदपि प्रशमादिलिङ्गमेवेति दर्शयन्नाह ॥

तत्तत्थसद्दहाणं सम्मत्तं तंमि पसममाईया ।
पढमकसाओवसमादविक्कया हुंति नियमेण ॥६२॥

[तत्त्वार्थश्रद्धानं सम्यक्त्वं तस्मिन्प्रशमादयः ।
प्रथमकषायोपशमाद्यपेक्षया भवन्ति नियमेन ॥६२॥]

तत्त्वार्थश्रद्धानं सम्यक्त्वं । तस्मिन्प्रशमादयोऽनन्तरोदिताः प्रथमकषायोपशमाद्यपेक्षया भवन्ति नियमेन। अयमत्र भावार्थः। न ह्यनन्तानुबन्धिक्षयोपशमादिमन्तरेण तत्त्वार्थश्रद्धानं भवति। सति च तत्क्षयोपशमे तदुदयवद्भव्यः सकाशादपेक्षयास्य प्रशमादयो विद्यन्त एवेति तत्त्वार्थश्रद्धानं सम्यक्त्वमित्युक्तं ।

के एते तत्त्वार्था इत्येतदभिधित्सयाह।

जीवाजीवासवबंधसंवरा निज्जरा य मुक्खो य।
तत्तत्था इत्थं पुण दुविहा जीवा समक्खाया॥ ६३ ॥

[जीवाजीवास्रवबन्धसंवरा निर्जरा च मोक्षश्च ।
तत्त्वार्था अत्र पुनः द्विविधा जीवाः समाख्याताः॥६३॥]

जीवाजीवास्रवबन्धसंवरा निर्जरा च मोक्षश्च तत्त्वार्था इति। एषां स्वरूपं वक्ष्यत्येव। असमासकरणं गाथाभंगभयार्थं निर्जरामोक्षयोः फलत्वेन प्राधान्यख्यापनार्थं चेति । अत्र पुनस्तत्त्वार्थचिन्तायां द्विविधा जीवाः समाख्यातास्तीर्थकरगणधरैरिति ।

द्वैविध्यमाह ।

संसारिणो य मुत्ता संसारी छव्विहा समासेण
पुढवीकाइअमादि तसकायंता पुढोभेया ॥ ६४ ॥

[संसारिणः च मुक्ताः संसारिणः षड्विधाः समासेन ।
पृथिवीकायिकादयस्त्रसकायान्ताः पृथग्भेदाः ॥ ६४ ॥]

चशब्दस्य व्यवहित उपन्यासः । संसारिणो मुक्ताश्चेति । तत्र

सोत्तरिणः षट्पिण्डाः षट्प्रकृतयः। समासेन जानितव्येति भावः। षट्पिण्डप्रतिपादनायाह। पृथिवीकायिकादयश्चत्वारः प्रत्येकं पर्याप्तकापर्याप्ताः। पर्याप्तेः "पुढविकाइया आउकाइया तेउकाइया वाउकाइया वणस्सइकाइया सव्वकाइया" पृथग्भेदा इति व्याख्यानतश्चैषां पृथग्भिन्नस्वरूपाः न तु परस्परपृथिवीकाया इति॥

सोत्तरिण एव प्रतिपादनद्वारगाथामाह।

भव्वाहारगपज्जत्तसुहुमसोवक्कमाउया चेव।
सत्तइपक्खा एए भणिया कम्मट्ठमहणेहिं॥ ६५॥

[भव्याहारकपर्याप्तशुद्धसोपक्रमायुषश्चैव।
सप्ततिपक्षा एते भणिता अष्टकर्ममथनैः॥ ६५॥]

भव्या आहारकाः पर्याप्ताः शुद्धा इति शुद्धपदिकाः सोपक्रमायुषश्चैव सप्ततिपक्षा एते भणिताः। तद्यथा। भव्याश्चाभव्याश्चाहारकाश्चेत्यादि। कर्मभणिता इत्याह। अष्टकर्ममथनैः तीर्थकरैरिति गाथाक्षरार्थः॥ भावार्थं तु स्वयमेव वक्ष्यति।

तत्राद्यद्वारमाह।

भव्वा जिणेहि भणिया इह खलु जे सिद्धिगमणजोग्गाउ।
ते पुण अणाइपरिणामभावओ हुंति नायव्वा॥६६॥

[भव्या जिनैर्भणिता इह खलु ये सिद्धिगमनयोग्यास्तु।
ते पुनरनादिपरिणामभावतो भवन्ति ज्ञातव्याः॥६६॥]

भव्या जिनैर्भणिता इह खलु ये सिद्धिगमनयोग्यास्तु। इह

लोके य एव सिद्धिगमनयोग्याः खलुशब्दस्यावधारणार्थत्वात् तुशब्दोऽप्येवकारार्थः योग्या एव । न तु सर्वे सिद्धिगामिन एव । यथोक्तं "भवा वि न सिज्झिस्सन्ति केइ" इत्यादि । भव्यत्वे निबन्धनमाह । ते पुनरनादिपरिणामभावतो भवन्ति ज्ञातव्याः । अनादिपारिणामिकभव्यभावयोगाद्भव्या इति ॥

विवरिया उ अभव्वा न कयाइ भवन्नवस्स ते पारं ।
गच्छिंसु जंति व तहा तत्तु च्चिय भावओ नवरं॥६७॥

[विपरीतास्त्वभव्या न कदाचिद्भवार्णवस्य ते पारं ।
गतवन्तो यान्ति वा तथा तत एव भावात् नवरं ॥६७॥]

विपरीतास्त्वभव्याः । तदेव विपरीतत्वमाह । न कदाचिद्भवार्णवस्य संसारसमुद्रस्य ते पारं पर्यन्तं गतवन्तो यान्ति वा वाशब्दस्य विकल्पार्थत्वात् यास्यन्ति वा । तथेति कुतो निमित्तादिति आह । तत एव भावात् तस्मादेव अनादिपारिणामिकादभव्यत्वभावादिति भावः । नवरमिति साभिप्रायकं अभिप्रायश्च नवरमेतावता वैपरीत्यमिति ।

भव्यद्वारानन्तरमाहारकद्वारमाह ।

विग्गहगइमावन्ना केवलिणो समुहया अजोगी य ।
सिद्धा य अणाहारा सेसा आहारगा जीवा ॥६८॥

[विग्रहगतिमापन्नाः केवलिनः समवहता अयोगिनश्च ।
सिद्धाश्चानाहारकाः शेषा आहारका जीवाः ॥ ६८ ॥]

विग्रहगतिमापन्ना अपान्तरालगतिवृत्तय इत्यर्थः । केवलिनः समवहताः समुद्घातं गताः । अयोगिनश्च केवलिन एव शैलेश्यवस्थामिति । सिद्धाश्च मुक्तिभाजः । एतेऽनाहारका ओजाद्याहाराणामन्यतमेनाप्यमी नाहारयन्तीत्यर्थः । शेषा उक्तविलक्षणा आहारका जीवा ओजलोमप्रक्षेपाहाराणां यथासंभवं येन केनचिदाहारेणेति । तेऽपि यावन्तं कालमनाहारकाः तांस्तथाभिधातुकाम आह ॥

एगाइ तिन्निसमया तिन्नेव ऽन्तोमुहुत्तमित्तं च ।
साइं अपज्जवसियं कालमणाहारगा कमसो ॥६९॥

[एकाद्यांस्त्रीन्समयान् त्रीनेव अन्तर्मुहूर्तमात्रं च ।
साद्यपर्यवसितं कालमनाहारकाः क्रमशः ॥ ६९ ॥]

एकाद्यांस्त्रीन्समयान् विग्रहगतिमापन्ना अनाहारकाः । उक्तं च "एकं द्वौ वानाहारकः" इति (तत्त्वार्थाधिगमसूत्रं २-३१) वाशब्दात्त्रिसमयग्रहः । त्रीनेव समयाननाहारकाः समुद्घाते केवलिनः । यथोक्तम् ॥

कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च । (प्रशमरति-३५१)
समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ॥ १ ॥

अन्तर्मुहूर्तं चानाहारका अयोगिकेवलिनः तत ऊर्ध्वमयोगिकेवलित्वाभावादपवर्गप्राप्तेः । साद्यपर्यवसितं कालमनाहारकाः सिद्धा व्यक्त्यपेक्षया तेषां सादित्वादपर्यवसितत्वाच्च । अत एवाह क्रमश एवंभूतेनैव क्रमेणेति गाथार्थः ।

व्याख्यातमाहारकद्वारं सांप्रतं पर्याप्तकद्वारमाह ।

नारयदेवा तिरिमणुय गब्भया जे असंखवासाऊ।
एए य अपज्जत्ता उववाए चेव बोद्धव्वा ॥ ७० ॥

[नारकदेवाः तिर्यङ्मनुष्या गर्भजा येऽसंख्येयवर्षायुषः।
एते चापर्याप्ता उपपात एव बोद्धव्याः ॥ ७० ॥]

नारकाश्च देवाश्च नारकदेवास्तथा तिर्यङ्मनुष्याः तिर्यञ्चश्च मनुष्याश्चेति विग्रहः गर्भजा गर्भव्युत्क्रान्तिकाः, संमूर्च्छिमव्यवच्छेदार्थमेतत्। ते च सङ्ख्येयवर्षायुषोऽपि भवन्ति तद्व्यवच्छेदार्थमाह। येऽसङ्ख्येयवर्षायुष इति। एते चापर्याप्ता आहारशरीरेन्द्रियप्राणापानभाषामनःपर्याप्तिभी रहिता उपपात एव उत्पद्यमानावस्थायामेव बोद्धव्या विज्ञेया न तूत्तरकालं पर्याप्ता लब्धितोऽपीति

सेसा उ तिरियमणुया लद्धिं पप्पोववायकाले य।
उभओ वि अ भइअव्वा पज्जत्तियरेत्ति जिणवयणं७१

[शेषास्तु तिर्यङ्मनुष्या लब्धिं प्राप्योपपातकाले च।
उभयतोऽपि भाज्याः पर्याप्तेतरे इति जिनवचनम्॥७१॥]

शेषास्तु तिर्यङ्मनुष्याः संमूर्छनजाः सङ्ख्येयवर्षायुषश्च गर्भजाः। किं लब्धिं प्राप्य पर्याप्तकलब्धिमधिकृत्य उपपातकाले चोत्पद्यमानावस्थायां च। किं। उभयतोऽपि भाज्या विकल्पनीयाः पर्याप्तका इतरे चापर्याप्तकाः। एतदुक्तं भवति। लब्धितोऽपि पर्याप्ता अपर्याप्तका अपि भवन्ति। उपपातावस्थायां त्वपर्याप्तका एव। इति जिनवचनं इत्येष आगम इति।

व्याख्यातं पर्याप्तकद्वारं तदनन्तरं शुक्लपाक्षिकद्वारमाह।

जेसिमवड्ढोपुग्गलपरियट्टो सेसओ उ संसारो ।
ते सुक्कपक्खिआ खलु अहिए पुण किन्हपक्खीया॥७२॥

[येषामपार्धपुद्गलपरावर्त एव शेषः संसारः ।
ते शुक्लपाक्षिकाः खलु अधिके पुनः कृष्णपाक्षिकाः७२]

येषामुपार्धपुद्गलपरावर्त एव शेषः संसारस्तत ऊर्ध्वं सेत्स्यन्ति ते शुक्लपाक्षिकाः क्षीणप्रायसंसाराः खलुशब्दो विशेषणार्थः प्राप्तदर्शना वा अप्राप्तदर्शना वा सन्तीति विशेषयति। अधिके पुनरुपार्धपुद्गलपरावर्ते संसारे कृष्णपाक्षिकाः क्रूरकर्माण इत्यर्थः । पुद्गलपरावर्तो नाम त्रैलोक्यगतपुद्गलानामौदारिकादिप्रकारेण ग्रहणं। उपार्धपुद्गलपरावर्तस्तु किंचिन्न्यूनोऽर्धपुद्गलपरावर्त इति ।

एतद्वारोपयोग्ये च वक्तव्यताशेषमाह ।

पायमिह कूरकम्मा भवसिद्धिया वि दाहिणिल्लेसु।
नेरइयतिरियमणुया सुरा य ठाणेसु गच्छंति ॥७३॥

[प्राय इह क्रूरकर्माणः भवसिद्धिका अपि दक्षिणेषु ।
नारकतिर्यङ्मनुष्याः सुराश्च स्थानेषु गच्छन्ति ॥७३॥]

प्राय इह क्रूरकर्माणः । बाहुल्येनैतदेवमिति दर्शनार्थं प्रायोग्रहणं । भवसिद्धिका अप्येकभवमोक्षयायिनोऽपि दक्षिणेषु नारकतिर्यङ्मनुष्याः सुराश्च स्थानेषु गच्छन्ति। अत एवोक्तं "दाहिणदिसिगामिए किण्हपक्खिए नेरइए" इत्यादि । एतदुक्तं भवति । नरकभवनद्वीपसमुद्रविमानेषु दक्षिणदिग्भागव्यवस्थितेषु कृष्णपाक्षिका

हेण, श्रूयते च बाह्यप्रत्ययवृषभादिसयव्यपेक्षा करकंडादीनां प्रत्येकबुद्धानां बोधिरिति । उपधिस्तु स्वयंबुद्धानां द्वादशविधः पात्रादिः प्रत्येकबुद्धानां तु नवविधः प्रावरणवर्जः । स्वयंबुद्धानां पूर्वाधीतश्रुतेऽनियमः प्रत्येकबुद्धानां नियमतो भवत्येव । लिङ्गप्रतिपत्तिः स्वयंबुद्धानामाचार्यसन्निधावपि भवति प्रत्येकबुद्धानां तु देवता प्रयच्छतीत्यलं विस्तरेण ॥ बुद्धबोधिता इति बुद्धबोधितसिद्धाः बुद्धा आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते इह गृह्यन्ते ॥ स्वान्यगृहिलिङ्गा इति स्वलिङ्गसिद्धा अन्यलिङ्गसिद्धा गृहिलिङ्गसिद्धाः । तत्र स्वलिङ्गसिद्धा द्रव्यलिङ्गं प्रति रजोहरणगोच्छकधारिणः । अन्यलिङ्गसिद्धाः परिव्राजकादिलिङ्गसिद्धाः । गृहिलिङ्गसिद्धा मरुदेवीप्रभृतय इति ॥

इत्थीपुरिसनपुंसग एगाणेग तह समयभिन्ना य ।
एसो जीवसमासो इतो इयरं पवक्खामि ॥ ७७ ॥

[स्त्रीपुरुषनपुंसका एकानेके तथा समयभिन्नाश्च ।
एष जीवसमसोऽत इतरं प्रवक्ष्यामि ॥ ७७ ॥]

एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः केचित् पुँलिङ्गसिद्धाः केचिन्नपुंसकलिङ्गसिद्धाः । आह किं तीर्थकरा अपि स्त्रीलिङ्गसिद्धा भवन्ति । भवन्तीत्याह । यत उक्तं सिद्धप्राभृते "सव्वत्थोवा तित्थगरिसिद्धा तित्थगरितित्थे नोतित्थसिद्धा अणङ्गत्थेयगुतित्थगरितित्थे णोतित्थगरिसिद्धा उ अणङ्गत्थेयगुणा उ तित्थ-

[illegible] [illegible] [illegible] [

हेन, श्रुतेन च बालप्रत्ययवृषभादिसमक्षमपेक्षा करकंडादीनां प्रत्येकबुद्धानां बोधिरिति । उपधिस्तु स्वयंबुद्धानां द्वादशविधः पात्रादिः प्रत्येकबुद्धानां तु नवविधः प्रावरणवर्जः । स्वयंबुद्धानां पूर्वाधीतश्रुतेऽनियमः प्रत्येकबुद्धानां नियमतो भवत्येव । लिङ्गमतिपत्तिः स्वयंबुद्धानामाचार्यसन्निधावपि भवति प्रत्येकबुद्धानां तु देवता प्रयच्छतीत्यलं विस्तरेण ॥ बुद्धबोधिता इति बुद्धबोधितसिद्धाः बुद्धा आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते इह गृह्यन्ते ॥ स्वान्यगृहिलिङ्गा इति स्वलिङ्गसिद्धा अन्यलिङ्गसिद्धा गृहिलिङ्गसिद्धाः । तत्र स्वलिङ्गसिद्धा द्रव्यलिङ्गं प्रति रजोहरणगोच्छकधारिणः । अन्यलिङ्गसिद्धाः परिव्राजकादिलिङ्गसिद्धाः । गृहिलिङ्गसिद्धा मरुदेवीप्रभृतय इति ॥

इत्थीपुरिसनपुंसग एगाणेग तह समयभिन्ना य ।
एसो जीवसमासो इतो इयरं पवक्खामि ॥ ७७ ॥

[स्त्रीपुरुषनपुंसका एकानेके तथा समयभिन्नाश्च ।
एष जीवसमासोऽत इतरं प्रवक्ष्यामि ॥ ७७ ॥]

एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः केचित् पुँल्लिङ्गसिद्धाः केचिन्नपुंसकलिङ्गसिद्धाः । आह किं तीर्थकरा अपि स्त्रीलिङ्गसिद्धा भवन्ति । भवन्तीत्याह । यत उक्तं सिद्धप्राभृते "सव्वत्थोवा तित्थगरिसिद्धा तित्थगरितित्थे नोतित्थसिद्धा असङ्खेयगुणा तित्थगरितित्थे णोतित्थगरिसिद्धा उ असङ्खेयगुणा उ तित्थ-

गतिनिष्ठे जीवनिष्पन्नसिद्धा अनन्तरक्षेत्रगुणा" इति। न नपुंसकलिङ्गे सिद्धाः। प्रत्येकबुद्धाश्च पुंल्लिङ्ग एव ॥ एकानेक इति। एकसिद्धा अनेकसिद्धाः। तत्रैकसिद्धा एकस्मिन्समये एक एव सिद्धः। अनेकसिद्धा एकस्मिन्समये प्रादयो यावदष्टशतं सिद्धमितिवचनात्॥

उर्ध्वलोक अधोलोक सर्वो यावन्तो य लोकस्य
भूतानां इत्यस्य पूर्वार्धेन अनुसम्बन्धः ॥ १ ॥

तथा समयसिद्धाश्चेति। प्रथमसमयसिद्धा अप्रथमसमयसिद्धा इत्यादि। तत्र अप्रथमसमयसिद्धाः परम्परसिद्धविशेषणप्रथमसमयवर्तिनः सिद्धत्वद्वितीयसमयवर्तिन इत्यर्थः। त्र्यादिषु तु द्विसमयसिद्धादयः प्रोच्यन्ते। अथवा सामान्येन प्रथमसमयसिद्धाभिधाने विशेषतो द्विसमयादिसिद्धाभिधानमिति॥ आह तीर्थसिद्धेनिसिद्धभेदद्वय एवान्तर्भावादष्टौ दोषभेदेरिति, न आद्यभेदद्वयादेर्योत्तरभेदाप्रतिपत्तेः शिष्यमतिविकासार्थश्च शास्त्रारम्भ इति। एष इत्थंलक्षणो जीवसमासो जीवसंक्षेप उक्त इति यावदेषः। अत ऊर्ध्वमजीवसमासं प्रवक्ष्यामीति गाथार्थः॥

धम्माधम्मागासा पुग्गल चउहा अजीय मो एए।
गइठिइअवगाहेहिं फासाईहिं च गम्मंति ॥७८॥

धर्माधर्माकाशाः पुद्गलाश्चतुर्धा अजीवा एवंते।
गतिस्थित्यवगाहैः स्पर्शादिभिश्च गम्यन्ते।
तत्र धर्माधर्माकाशा गतिस्थित्यवगाहैर्गम्यन्ते। पुद्गलाश्च स्प-

१ सिद्ध २ (प्रथमसमयवर्तिन. सिद्धानित्यादि)

र्शादिभिः । असमासकरणं धर्मादीनां त्रयाणामप्यमूर्तत्वेन भिन्न ज्ञातीयख्यापनार्थम् । इत्येष गाथाक्षरार्थः । भावार्थस्तु धर्मा दिग्रहणेन पदैकदेशेऽपि पदप्रयोगदर्शनाद्धर्मास्तिकायादयो गृ ह्यन्ते । स्वरूपं चैतेषां ।

जीवानां पुद्गलानां च गत्युपष्टम्भकारणं ।
धर्मास्तिकायो ज्ञानस्य दीपश्चक्षुष्मतो यथा ॥ १ ॥
जीवानां पुद्गलानां च स्थित्युपष्टम्भकारणं ।
अधर्मः पुरुषस्येव तिष्ठासोरवनिस्समा ॥ २ ॥
जीवानां पुद्गलानां च धर्माधर्मास्तिकाययोः
बादरापां घटो यद्वदाकाशमवकाशदम् ॥ ३ ॥
स्पर्शरसगन्धवर्णशब्दा मूर्तस्वभावकाः ।
संघातभेदनिष्पन्नाः पुद्गला जिनदेशिताः ॥ ४ ॥

इति कृतं विस्तरेण । उक्ता अजीवाः सांप्रतमास्रवद्वारमाह ।

कायवयमणोकिरियाजोगो सो आसवो सुहो सो अ ।
पुन्नस्स मुणेयव्वो विवरीओ होइ पावस्स ॥ ७९ ॥

[कायवाङ्मनःक्रियायोगः स आश्रवः शुभः स च ।
पुण्यस्य मुणितव्यो विपरीतो भवति पापस्य ॥ ७९ ॥]

कायवाङ्मनःक्रियायोगः । क्रिया कर्म व्यापार इत्यनर्थान्तरं ज्यत इति योगः युज्यते वानेन करणभूतेनात्मा कर्मणेति योगो ापार एव स आश्रवः । आस्रवत्यनेन कर्मेत्यास्रवः सरःसलिला हिस्रोतोवत् । शुभः स चास्रवः पुण्यस्य मुणितव्यो विपरीतो वति पापस्येति । आत्मनि कर्माणुप्रवेशमात्रहेतुरास्रव इति ।

उक्त आश्रवः। सांप्रतं बन्ध उच्यते॥

सकषायत्वाज्जीवो जोग्गे कम्मस्स पुग्गले लेइ।
सो बंधो पयइठिईअणुभागपएसभेओ ओ॥ ८०॥

[सकषायत्वाज्जीवो योग्यान् कर्मणः पुद्गलान् लाति।
स बन्धः प्रकृतिस्थित्यनुभागप्रदेशभेद एव॥ ८०॥]

कषायाः क्रोधादयः सह कषायैः सकषायः तद्भावः तस्मात् सकषायत्वाज्जीवो योग्यानुचितान् कर्मणः ज्ञानावरणादेः पुद्गलान् परमाणून् लात्यादत्ते गृह्णातीत्यनर्थान्तरं स बन्धः। योऽसौ तथास्थित्या स्वादानविशेषः स बन्ध इत्युच्यते। स च प्रकृतिस्थित्यनुभावप्रदेशभेद एव भवति। प्रकृतिबन्धो ज्ञानावरणादिप्रकृतिरूपः। स्थितिबन्धोऽस्यैव जघन्येतरा स्थितिः। अनुभावबन्धो यस्य यथायत्यां विपाकानुभवनमिति। प्रदेशबन्धस्त्वात्मप्रदेशैर्योगस्तथा कालेनैव विशिष्टविपाकरहितं वेदनमिति।

उक्तो बन्ध इदानीं संवरमाह॥

आसवनिरोह संवर समिईगुत्ताइएहि नायव्वो।
कमाण णुवायाणं भावत्थो होइ एयस्स॥ ८१॥

[आश्रवनिरोधः संवरः समितिगुप्त्यादिभिर्ज्ञातव्यः।
कर्मणामनुपादानं भावार्थो भवत्येतस्य॥ ८१॥]

आश्रवनिरोधः संवरः। आश्रव उक्त एव। तन्निरोधः कार्त्स्न्येन निश्चयतः सर्वसंवर उच्यते। देशो व्यवहारसंवर इति। स

समितिगुप्त्यादिभिर्ज्ञातव्यः। उक्तं च "स समितिगुप्तिधर्मानुप्रेक्षा परीषहजयचारित्रैः" इत्यादि (तत्त्वार्थाधिगमसूत्रम् ९-४) कर्मणाम नुपादानं भावार्थो भवत्येतस्य संवरस्य। इह यावानेवांशः कर्म णामनुपादानहेतुर्धर्मादीनां तावानेवेह गृह्यते। शेषस्य तपस्येवा न्तर्भावात् तस्य च प्रागुपात्तक्षयनिमित्तत्वादिति। अत्र यद् वक्तव्यं। तत्तु नोच्यते। गमनिकामात्रत्वादारंभस्येति।

उक्तः संवरः सांप्रतं निर्जरोच्यते॥

तवसा उ निज्जरा इह निज्जरणं खवणनासमेगट्ठा।
कम्माभावापायणमिह निज्जरमो जिना विंति॥८२॥

[तपसा तु निर्जरा इह निर्जरणं क्षपणं नाश एकार्थाः।
कर्माभावापादानमिह निर्जरा जिना ब्रुवते॥ ८२॥]

तपसा तु निर्जरा इह। अनशनादिभेदभिन्नं तपः तेन प्रागु पात्तस्य कर्मणो निर्जरा भवति। निर्जराशब्दार्थमेवाह। निर्जरणं क्षपणं नाश इत्येकार्थाः पर्यायशब्दा इति। नानादेशजविनेयगण प्रतिपत्त्यर्थं अज्ञातज्ञापनार्थं चैतेषामुपादानमदुष्टमेव। अस्या एव भावार्थमाह। कर्माभावापादानमिह निर्जरा जिना ब्रुवते प्रकटा र्थमेतदिति।

उक्ता निर्जरा इदानीं मोक्षमाह।

नीसेसकम्मविगमो मुक्खो जीवस्स सुद्धरूवस्स।
सादऽपज्जवसाणं अव्वाबाहं अयत्थाणं॥ ८३॥

[निःशेषकर्मविगमो मोक्षो जीवस्य शुद्धस्वरूपस्य ।
साद्यपर्यवसानमव्याबाधमवस्थानम् ॥ ८३ ॥]

निःशेषकर्मविगमो मोक्षः । कृत्स्नकर्मक्षयान्मोक्ष इति वचनात् (तत्त्वार्थाधिगमसूत्रम् १०-१) जीवस्य शुद्धस्वरूपस्य कर्मसंयोगापादितरूपरहितस्येत्यर्थः । साद्यपर्यवसानं अव्याबाधं व्याबाधावर्जितमवस्थानमवस्थितिः जीवस्यासौ मोक्ष इति । साद्यपर्यवसानता चेह व्यक्त्यपेक्षया न तु सामान्येन । मोक्षस्यापि अनादिमत्यमिति ।

उक्तं तत्त्वं, अधुना प्रकृतं योजयति ॥

एयमिह सद्दहंतो सम्मद्दिट्ठी तओ अ नियमेण ।
भवनिव्वेयगुणाओ पसमाइगुणासओ होइ ॥ ८४ ॥

[एतदिह श्रद्दधानः सम्यग्दृष्टिः तकश्च नियमेन ।
भवनिर्वेदगुणात् प्रशमादिगुणाश्रयो भवति ॥ ८४ ॥]

एतदनन्तरोदितं जीवाजीवादीह लोके प्रवचने या श्रद्दधानः एवमेवेदमित्याद्रान्तःकरणतया प्रतिपद्यमानः सम्यग्दृष्टिरभिधीयते, अविपरीतदर्शनादिति, तकश्च नियमेनासावदृश्यंतया भवनिर्वेदगुणात् संसारनिर्वेदगुणेन प्रशमादिगुणाश्रयो भवति उक्तलक्षणानां (५२) प्रशमादिगुणानामाधारो भवति । भवति चेत्थंज्ञाने संसारनिर्वेदगुणः । तस्माच्च प्रशमादयः । प्रतीतमेतदिति अस्यैव व्यतिरेकमाह ॥

समितिगुप्त्यादिभिर्ज्ञातव्यः। उक्तं च "स समितिगुप्तिधर्मानुप्रेक्षपरीषहजयचारित्रैः" इत्यादि (तत्त्वार्थाधिगमसूत्रम् ९-४) कर्मणामनुपादानं भावार्थो भवत्येतस्य संवरस्य। इह यावानेवांशः कर्मणामनुपादानहेतुर्धर्मादीनां तावानेवेह गृह्यते। शेषस्य तपस्येवन्तर्भावात् तस्य च प्रागुपात्तक्षयनिमित्तत्वादिति। अत्र वक्तव्यं। तत्तु नोच्यते। गमनिकामात्रत्वादारंभस्येति।

उक्तः संवरः सांप्रतं निर्जरोच्यते॥

तवसा उ निज्जरा इह निज्जरणं खवणनासमेगट्ठा
कम्माभावापायणमिह निज्जरमो जिना विंति॥८२॥

[तपसा तु निर्जरा इह निर्जरणं क्षपणं नाश एकार्थाः।
कर्माभावापादानमिह निर्जरा जिना ब्रुवते॥ ८२॥]

तपसा तु निर्जरा इह। अनशनादिभेदभिन्नं तपः तेन प्रागुपात्तस्य कर्मणो निर्जरा भवति। निर्जराशब्दार्थमेवाह। निर्जरणं क्षपणं नाश इत्येकार्थाः पर्यायशब्दा इति। नानादेशजविनेयगणप्रतिपत्त्यर्थं अज्ञातज्ञापनार्थं चैतेषामुपादानमदुष्टमेव। अस्या एव भावार्थमाह। कर्माभावापादानमिह निर्जरा जिना ब्रुवते प्रकटार्थमेतदिति।

उक्ता निर्जरा इदानीं मोक्षमाह।

नीसेसकम्मविगमो मुक्खो जीवस्स सुद्धरूवस्स।
साइ अपज्जवसाणं अव्वाबाहं अवत्थाणं॥ ८३॥

[निःशेषकर्मविगमो मोक्षो जीवस्य शुद्धस्वरूपस्य।
साद्यपर्यवसानमव्याबाधमवस्थानम् ॥ ८३ ॥]

निःशेषकर्मविगमो मोक्षः । कृत्स्नकर्मक्षयान्मोक्ष इति वचनात् (तत्त्वार्थाधिगमसूत्रम् १०-१) जीवस्य शुद्धस्वरूपस्य कर्मसंयोगापादितरूपरहितस्येत्यर्थः । साद्यपर्यवसानं अव्याबाधं व्याबाधावर्जितमवस्थानमवस्थितिः जीवस्यासौ मोक्ष इति । साद्यपर्यवसानता चेह व्यक्त्यपेक्षया न तु सामान्येन । मोक्षस्यापि अनादिमत्यमिति ।

उक्तं तत्त्वं, अधुना प्रकृतं योजयति ॥

एयमिह सद्दहंतो सम्मदिट्ठी तओ अ नियमेण।
भवनिव्वेयगुणाओ पसमाइगुणासओ होइ ॥ ८४ ॥

[एतदिह श्रद्दधानः सम्यग्दृष्टिः ततश्च नियमेन ।
भवनिर्वेदगुणात् प्रशमादिगुणाश्रयो भवति ॥ ८४ ॥]

एतदनन्तरोदितं जीवाजीवादीह लोके प्रवचने वा श्रद्दधानः एवमेवेदमित्यार्द्रान्तःकरणतया प्रतिपद्यमानः सम्यग्दृष्टिरभिधीयते, अविपरीतदर्शनादिति, ततश्च नियमेनासावधरयंतदा भवनिर्वेदगुणात् संसारनिर्वेदगुणेन प्रशमादिगुणाश्रयो भवति उत्तरगुणानां (५१) प्रशमादिगुणानामाधारो भवति । भवति चैवंज्ञाने संसारनिर्वेदगुणः । तस्माच्च प्रशमादयः । प्रतीतमेतदिति अस्यैव व्यतिरेकमाह ॥

विवरीयसद्दहाणे मिच्छाभावाओ नत्थि केइ गुणा।
अणभिनिवेसो उ कयाइ होइ सम्मत्तहेऊ वि ॥८५॥

[विपरीतश्रद्दधाने मिथ्याभावान्न सन्ति केचन गुणाः ।
अनभिनिवेशस्तु कदाचिद्भवति सम्यक्त्वहेतुरपि॥८५॥]

विपरीतश्रद्धाने उक्तलक्षणानां जीवादिपदार्थानामन्यथा श्रद्धाने मिथ्याभावान्न सन्ति केचन गुणाः सर्वत्रैव विपर्ययादिति भावः। विपरीतश्रद्धानेऽप्यनभिनिवेशस्तु एवमेवैतदित्यनध्यवसायस्तु कदाचित्कस्मिंश्चित्काले यद्वा कदाचित् न नियमेनैव भवति सम्यक्त्वहेतुरपि जायते सम्यक्त्वकारणमपि। यथेन्द्रनागादीनामिति।

इदं च सम्यक्त्वमतिचाररहितमनुपालनीयमिति। अतस्तानाह

सम्मत्तस्सइयारा संका कंखा तहेव वितिगिच्छा।
परपासंडपसंसा संथवमाई य नायव्वा ॥ ८६ ॥

[सम्यक्त्वस्यातिचाराः शङ्का कांक्षा तथैव विचिकित्सा।
परपाषण्डप्रशंसा संस्तवादयश्च ज्ञातव्याः ॥ ८६ ॥]

सम्यक्त्वस्य प्राङ्निरूपितशब्दार्थस्यातिचारा अतिचरणानि अतिचारा असदनुष्ठानविशेषाः यैः सम्यक्त्वमतिचरति विराधयति वा। ते च शंकादयः। तथा चाह। शंका कांक्षा तथैव विचिकित्सा परपाषण्डप्रशंसा संस्तवादयश्च ज्ञातव्याः। आदिशब्दादनुपबृंहणास्थिरीकरणादिपरिग्रहः। शंकादीनां स्वरूपं वक्ष्यत्येवेति।

संसयकरणं संका कंखा अन्नन्नदंसणग्गाहो।
संतंमि वि वितिगिच्छा सिज्झिज्ज न मे अयं अट्ठो ८७

[संशयकरणं शङ्का कांक्षान्योन्यदर्शनग्राहः ।
सत्यपि विचिकित्सा सिध्येत न मेऽयमर्थः ॥ ८७ ॥]

संशयकरणं शङ्का भगवदर्हत्प्रणीतेषु पदार्थेषु धर्मास्तिकायादि-ष्वत्यन्तगहनेषु मतिदौर्बल्यात्सम्यगनवधार्यमाणेषु संशय इत्यर्थः। किमेवं स्यान्नैवमिति । सा पुनर्द्विभेदा । देशसर्वभेदात्। देशशङ्का देशविषया यथा किमयमात्मासङ्ख्येयप्रदेशात्मकः स्यादथ निःप्र-देशो निरवयवः स्यादिति । सर्वशङ्का पुनः सकलास्तिकायग्रात ख्य किमेवं स्यान्नैवमिति ॥ कांक्षान्योन्यदर्शनग्राहः । सुगता-दिप्रणीतेषु दर्शनेषु ग्राहोऽभिलाष इति । सा पुनर्द्विभेदा देशसर्वभेदात् । देशविषया एकमेव सांगतं दर्शनमाकांक्षति चि-त्तजयोऽत्र प्रतिपादितोऽयमेव च प्रधानो मुक्तिहेतुरिति अतो घटमानकमिदं न दूरापेतमिति । सर्वकांक्षा तु सर्वदर्शनान्येव कां-क्षति अहिंसाप्रतिपादनपराणि सर्वाण्येव कपिलकणभक्षाक्षपादम-तानीह लोके च नात्यन्तदुःखप्रतिपादनपराणि अतः शोभनान्ये-वेति ॥ सत्यपि विचिकित्सा सिध्येत न मेऽयमर्थ इति । अयम-त्र भावार्थः । विचिकित्सा मतिविभ्रमो युक्त्यागमोपपन्नेऽप्यर्थे फलं प्रति संमोहः । किमस्य महतस्तपःक्लेशायासस्य सिकताकण कवलकल्पस्य वनकायत्वादेरायत्यां मम फलसंपन्नविष्यति किं वा नेति । उभयथेह क्रियाः फलवत्यो निष्फलाश्च दृश्यन्ते कृषी-वलानाम् । न चेयं शङ्कातो न भिद्यते इत्याशङ्कनीयं । शंका हि सकलदा सकलपदार्थभावत्वेन द्रव्यगुणविषया । इयं तु क्रियादि-

विवरीयसद्दहाणे मिच्छाभावाओ नत्थि केइ गुणा
अणभिनिवेसो उ कयाइ होइ सम्मत्तहेऊ वि ॥८५॥

[विपरीतश्रद्दधानं मिथ्याभावान्न सन्ति केचन गुणाः
अनभिनिवेशस्तु कदाचिद्भवति सम्यक्त्वहेतुरपि॥८५॥]

विपरीतश्रद्धानं उक्तलक्षणानां जीवादिपदार्थानामन्यथा श्रद्धानं मिथ्याभावान्न सन्ति केचन गुणाः सर्वत्रैव विपर्ययादिति भावः। विपरीतश्रद्धानेऽप्यनभिनिवेशस्तु एवमेवैतदित्यनध्यवसायस्तु कदाचित्कस्मिंश्चित्काले यद्वा कदाचित् न नियमेनैव भवति सम्यक्त्वहेतुरपि जायते सम्यक्त्वकारणमपि। यथेन्द्रनागादीनामिति। इदं च सम्यक्त्वमतिचाररहितमनुपालनीयमिति। अतस्तानाह

सम्मत्तस्सइयारा संका कंखा तहेव वितिगिच्छा।
परपासंडपसंसा संथवमाई य नायव्वा ॥ ८६ ॥

[सम्यक्त्वस्यातिचाराः शङ्का कांक्षा तथैव विचिकित्सा।
परपाषण्डप्रशंसा संस्तवादयश्च ज्ञातव्याः ॥ ८६ ॥]

सम्यक्त्वस्य प्राङ्निरूपितशब्दार्थस्यातिचारा अतिचरणानि अतिचारा असदनुष्ठानविशेषाः यैः सम्यक्त्वमतिचरति विराधयति वा। ते च शंकादयः। तथा चाह। शंका कांक्षा तथैव विचिकित्सा परपाषण्डप्रशंसा संस्तवादयश्च ज्ञातव्याः। आदिशब्दादनुपबृंहणास्थिरीकरणादिपरिग्रहः। शंकादीनां स्वरूपं वक्ष्यत्येवेति।

संसयकरणं संका कंखा अन्नन्नदंसणग्गाहो।
संतंमि वि वितिगिच्छा सिज्झिज्ज न मे अयं अट्ठो ८७

[संशयकरणं शङ्का कांक्षान्योन्यदर्शनग्राहः ।
सत्यपि विचिकित्सा सिध्येत न मेऽयमर्थः ॥ ८७ ॥]

संशयकरणं शङ्का भगवदर्हत्प्रणीतेषु पदार्थेषु धर्मास्तिकायादिष्वत्यन्तगहनेषु मतिदौर्बल्यात्सम्यगनवधार्यमाणेषु संशय इत्यर्थः। किमेवं स्यान्नैवमिति । सा पुनर्द्विभेदा । देशसर्वभेदात्। देशशङ्का देशविषया यथा किमयमात्मासङ्ख्येयप्रदेशात्मकः स्यादथ निःप्रदेशो निरवयवः स्यादिति । सर्वशङ्का पुनः सकलास्तिकायघात एव किमेवं स्यान्नैवमिति ॥ कांक्षान्योन्यदर्शनग्राहः । सुगतादिप्रणीतेषु दर्शनेषु ग्राहोऽभिलाष इति । सा पुनर्द्विभेदा देशसर्वभेदात् । देशविषया एकमेव सौगतं दर्शनमाकांक्षति चित्तजयोऽत्र प्रतिपादितोऽयमेव च प्रधानो मुक्तिहेतुरिति अतो घटमानकमिदं न दूरापेतमिति । सर्वकांक्षा तु सर्वदर्शनान्येव कांक्षति अहिंसाप्रतिपादनपराणि सर्वाण्येव कपिलकणभक्षाक्षपादमतानीह लोके च नात्यन्तक्लेशप्रतिपादनपराणि अतः शोभनान्येवेति ॥ सत्यपि विचिकित्सा सिध्येत न मेऽयमर्थ इति । अयमत्र भावार्थः । विचिकित्सा मतिविभ्रमो युक्तयागमोपपन्नेऽप्यर्थे फलं प्रति संमोहः । किमस्य महतस्तपःक्लेशायासस्य सिकताकण कवलकल्पस्य कनकावल्यादेरायत्यां मम फलसंपद्भविष्यति किं वा नेति । उभयथेह क्रियाः फलवत्यो निष्फलाश्च दृश्यन्ते कृषीबलानाम् । न चेयं शङ्कातो न भिद्यते इत्याशङ्कनीयं । शंका हि सकला सकलपदार्थभाक्त्वेन द्रव्यगुणविषया । इयं तु क्रियावि-

पर्यैव । तत्त्वतस्तु सर्व एते प्रायो मिथ्यात्वमोहनीयोदयतो भवन्तो जीवपरिणामविशेषाः सम्यक्त्वातिचारा उच्यन्ते । न सूक्ष्मेक्षिका अत्र कार्येति । अथवा विचिकित्सा विद्वद्जुगुप्सा । विद्वांसः साधवो विदितसंसारस्वभावाः परित्यक्तसर्वसङ्गास्तेषां जुगुप्सा निन्दा । तथाहि तेऽस्नानात्प्रस्वेदजलक्लिन्नमलिनत्वात् दुर्गन्धवपुषो भवन्ति तान्निन्दति । को दोषः स्याद्यदि प्राशुकेन वारिणाङ्गप्रक्षालनं कुर्वीरन् भगवन्त इति । इयमपि न कार्या। देहस्यैव परमार्थतोऽशुचित्वादिति ॥

परपाषंडपसंसा सक्काइणमिह वन्नवाओ उ ।
तेहिं सह परिचओ जो स संथवो होइ नायव्वो ॥८८॥

[परपाषंडप्रशंसा शाक्यादीनामिह वर्णवादस्तु ।
तैः सह परिचयो यः स संस्तवो भवति ज्ञातव्यः ८८]

परपाषण्डानां सर्वज्ञप्रणीतपाषण्डव्यतिरिक्तानां प्रशंसेति समासः प्रशंसनं प्रशंसा स्तुतिरित्यर्थः । तथा चाह । शाक्यादीनामिह वर्णवादस्तु। शाक्या रक्तभिक्षव आदिशब्दात्परिव्राजकादिपरिग्रहः। वर्णवादः प्रशंसोच्यते पुण्यभाज एते सुलब्धमेभिर्मानुजं जन्म दयालव एत इत्यादि ॥ तैः परपाषण्डैरनन्तरोदितैः सह परिचयो यः स संस्तवो भवति ज्ञातव्यः परपाषण्डसंस्तव इत्यर्थः संस्तव इह संवादजनितः परिचयः संवसनभोजनालापादिलक्षणः परिगृह्यते न स्तवरूपः तथा च लोके प्रतीत एव संपूर्वः स्तौतिः परिचय इति "असंस्तुतेषु प्रसभं भयेषु" इत्यादौ इति ॥

अधुना शंकादीनामतिचारतामाह ।

संकाए मालिन्नं जायइ विसयम्मि पइजो अ जिणे ।
सम्मत्ताणुचिओ सत्तु इइ अइआरो भवे संका ॥६०॥

[शंकायां मालिन्यं जायते विषये प्रतिपद्यश्च जिने ।
सम्यक्त्वानुचितः स्यादिति अतिचारो भवति शङ्का ॥८९]

शङ्कायामुपलक्षणायां सत्यां मालिन्यं जायतेऽत्यर्थोपलक्षणादासन्नीकृत्य व्याख्यानार्थं जायते । कस्मिन् विषयेऽन्तरेण सम्यक्त्वप्राप्त्यर्थं अविष्यमाणश्च जिनेऽर्हति जायत इति वर्तते । न ह्यासन्नया प्रतिपद्यवचने शोभायमानुचितः सम्यक्त्वानुचित एव । न हि सम्यक्त्वमालिन्ये तदभावमन्तरेणैव भवति । इत्येवमनेन प्रकारेण अतिचारो भवति शङ्का सम्यक्त्वस्येति प्रक्रमाद्गम्यते । अतिचारश्चैष यतिधर्मादिरोधापेक्षयागतोदेन वा सम्येतस्मिन् तस्य खण्डनमात्रं तदभावो वा मात्रा । तथा चार्षैरप्युक्तं ।

यत्र विषयस्थे शङ्किते अन्यथोऽर्हति हि तत्त्वं ।
तिष्ठति च दर्शनं तत्र अतिचारेणोपलक्षणतोऽयम् । इति

अतिपादितं शङ्काया अतिचारत्वं । अधुना दोषमाह ॥

सासइ इमीइ नियमा तत्तामिनिवेस ओ सुविहियाण य ।
तत्तो अ संघदोसो सयरा एवं विदंजिज्जा ॥ ९० ॥

[सदपास्यवचा नियमात्तत्त्वाभिनिवेशतो मोः सुविहितानां च ।
ततश्च सङ्घदोषः सकलादेवं विदर्जयेत् ॥ ९० ॥]

नश्यत्यनया शंकया हेतुभूतया अस्यां वा सत्यां नियमान्नियमेनावश्यंतया तत्त्वाभिनिवेशः सम्यक्त्वाध्यवसायः श्रद्धाभावादनुभवसिद्धमेतत्। मो इति पूरणार्थो निपातः। सुक्रिया च शोभना चात्यन्तोपयोगप्रधाना क्रिया च नश्यति श्रद्धाभावात् एतदपि अनुभवसिद्धमेव। ततश्च तस्माच्च तत्त्वाभिनिवेशसुक्रियानाशात् बन्धदोषः कर्मबन्धापराधः। यस्मादेवं तस्मादेनां शङ्कां विवर्जयेत्। ततश्च मुमुक्षुणा व्यपगतशङ्केन सता मतिदौर्बल्यात्संशयास्पदमपि जिनवचनं सत्यमेव प्रतिपत्तव्यं सर्वज्ञाभिहितत्वात्तदन्यपदार्थवदिति।

उक्तः पारलौकिको दोषः। अधुनैहलौकिकमाह॥

इह लोगम्मि वि दिट्ठो संकाए चेव दारुणो दोसो।
अविसयविसयाए खलु पेयापेया उदाहरणं॥ ९१॥

[इह लोके ऽपि दृष्टः शङ्काया एव दारुणो दोषः।
अविषयविषयायाः खलु पेयापेयाउदाहरणम्॥९१॥

इह लोकेऽप्यास्तां तावत्परलोक इति दृष्ट उपलब्धः शङ्काया एव सकाशाद्दारुणो दोषः रौद्रोऽपराधः। किंविशेषणशङ्कायाः। नेत्याह। अविषयविषयायाः खलु। खलुशब्दोऽवधारणे। अविषयविषयाया एव। अविषयो नाम यत्र शङ्का न कार्यते।

पेयापेयाउदाहरणं। अयमेवं। जहा एगंमि नगरे एगस्स सेट्ठिस्स दोन्नि पुत्ता इहलोए पडन्ति मिणेहयाए तेसिं माया मा कोइ गुच्छिही अन्नमन्नारिए अन्नमन्नपेयं देहि तत्थ परिभुंज-

माणो चेव एगो चिंतेइ णूणं मच्चिपाउ एयाउ तरंग व संकाउ पुणो पुणो धर्मतरंग पगुलीपाही जाओ मओ य इहलोगभोगाण अणा भागी जाओ। अपरो न माया अहियं चिंतेइ सि णिस्संको विगइ णिरएण य गहिओ विज्जाबलाबलावो इहलोगियभोगाण य आभागी जाउत्ति। उपनयस्तु पूर्ववत् एवंति।

सांप्रतं कांक्षादिष्वतिचारत्वमाह॥

एवं कंखाईसु वि अइयारत्तं तहेव दोषा य।
जोइज्जा नाए पुण पत्तेयं चेव वुच्छामि॥ ९२॥

[एवं कांक्षादिष्वपि अतिचारत्वं तथैव दोषांश्च।
योजयेत् ज्ञातानि पुनः प्रत्येकमेव वक्ष्ये॥ ९२॥]

एवं कांक्षादिष्वपि यथा शङ्कायामतिचारत्वं तथैव दोषाश्च योजयेत्। यतः कांक्षायामपि मालिन्यं जायते चित्तस्याप्रत्ययश्च जिने भगवता प्रतिषिद्धत्वात्। एवं विचिकित्सादिष्वपि भावनीयं। तस्मान्न कर्तव्याः कांक्षादयः। ज्ञातानि पुनः प्रत्येकमेव कांक्षादिषु वक्ष्येऽभिधास्य इति॥

रायामच्चो विज्जासाहगसङ्गसुया य चाणक्को।
सोरट्ठसावओ खलु नाया कंखाइसु हवन्ति॥ ९३॥

राजामात्यो विद्यासाधकः श्रावकसुता च चाणक्यः
सौराष्ट्रश्रावकः खलु ज्ञातानि कांक्षादिषु भवन्ति।

तत्र कांक्षायां राजामात्यौ, राजकुमारामच्चो य अस्सेणावहरिया
१ वणफलादिणि खायंति पडिणियत्ताणं

राया चिंतेइ लड्डुयपूयलगमाईणि सव्वाणि खामि आगया दोवि जणा रन्ना सूयारा भणिया जं लोए पयरइ तं सव्वं सवे रंधेह तेहिं रंधित्ता उवट्ठवियं रन्नो सो राया पेच्छरायेदिट्ठंतं करेइ कप्पडियावलिएहिधाडिज्जंति एवं मिट्ठस्स अवगासे होइ त्ति कणगकुंडगाईणि उंडेराणि विखइयाणि तेहिं सूलेण मओ। अमच्चेण पुण वमणविरेयणाणि कयाणि सो भोगाणं आभागी जाओ त्ति॥

विचिकित्सायां विद्यासाधकसावगो नंदीसरवरगमणं दिव्वगंधाणं देवसंसग्गेण मित्तस्स पुच्छणं विज्जाएपदाणं साहणं मसाणे चउपायगसिक्कयं हेट्ठा इंगालखायरोयस्तलो अट्ठसयवारा परिजवित्ता पादो सिक्कगस्स च्छिज्जइ एवं बीओ तइओ य च्छिज्जइ। चउत्थे छिन्ने आगासेण वच्चइ तेण सा विज्जा गहिया कालचउद्दसिरत्तिं साहेइ मसाणे चोरो य णयरारक्खिएहिं पारद्धो (पल्लिओ) परिभममाणो तत्थेव अइगओ। ताहे वेढेउं मसाणं ठिया पभाए घिप्पिही सो य भमंतो तं विज्जासाहगं पेच्छइ। तेण पुच्छिओ सो भणइ। विज्जं साहेमि। चोरो भणइ। केण ते दिण्णा सो भणइ सावगेणं चोरेण भणियं इमं दव्वं गिण्हाहि विज्जं देहि। सो सड्ढो विचिकिच्छइ सिज्झेज्जा न व इत्ति। तेणं दिन्ना चोरो चिंतेइ सावगो कीडियाएवि पावं नेच्छइ सच्चमेयं सो साहिउमारद्धो सिद्धा। इयरो सलोद्दो (सलुत्तो) गहिओ। तेण आगासगएण लोगो भेसिओ ताहे सो मुक्को दोवि सावगा जायत्ति॥

विद्वज्जुगुप्सायां श्रावकसुताउदाहरणे एगो सेट्ठी पवंते वलइ (तलइ) तस्स धूयाविवाहे कहवि साहुणो आगया। सा पिउणा

भणिया पुत्तिए पडिलाभेहि साहुणो सा मंडियपसाहिया पडिलाभेइ साहूण जल्लगंधो तीए आघातो सा चिंतेइ। अहो अणवज्जो भट्टारगेहिं धम्मो देसिओ जइ पुण फासुएण पाणीएण ण्हाएज्जा को दोसो होज्जा । सा तस्स ट्ठाणस्स अणालोइय अपडिक्कंता कालं काऊणं रायगिहे गणियापाढे समुप्पन्ना। गब्भगया चेव अरइं जणेइ गब्भसाउणेहि य ण सडइ ॥ जाया समाणी उज्झिया। सा गंधेण तं वनं वासेइ। सेणिओ तेण पदेसेण णिगच्छइ सामिणो वंदिउ सो खंधावारो तीए गंधं ण सहइ। रन्ना पुच्छियं किं एयं तेहिं कहियं दारियाए गंधो गंत्तूणं दिट्ठा भणइ एस एव पढम पुच्छत्ति गओ वंदित्ता पुच्छइ तओ भगवया तीए उट्ठाणपारियावणिया कहिया। तओ राया भणइ कहिं एसा पच्चणुभविस्सइ सुहं वा दुक्खं वा। सामी भणइ एएण कालेण येइयं इयाणिं सा तव चेव भज्जा भविस्सइ अग्गमहिसी ॥ अट्ठ संवच्छराणि जाय सुब्भं रममाणस्स पट्टीएहं सो लीलं काहिइ तं जाणिज्ज सुवंदित्ता गओ। सा य अवगयगंधा आहीरेण गहिया संवड्ढिया जोव्वणत्था जाया । कोमुइचारं मायाए समं आगया। अभओ सेणिओ य पच्छन्ना कोमुइचारं पेच्छंति। तीए दारियाए अंगफासेण सेणिओ अज्झोववन्नो नाममुद्दं दसिया तीए बंधइ। अभयस्स कहियं नाममुदा हरिया मग्गाहि । तेण मणुस्सा दोरेहिं बद्धेहिं ठविया । एक्केकं माणुस्सं पडोएऊण णीणिज्जइ । सा दारिया दिट्ठा चोरित्ति गहिया परिणीया य।

अन्नया य वस्सोकेण रमंति रायणं राणियाउ पोत्तेण वाहिंति। इयरी पोत्तं दाउं विलग्गा रन्ना सरियं मुक्का य पयइया ॥

परपाषण्डप्रशंसायां चाणक्यः। पाडलिपुत्ते चाणको चंदगुत्तेण भिक्खुकाण वित्ती हरिया। ते तस्स धम्मं कहेंति। राया तुस्सइ चाणकं पलोएइ ण पसंसइ तेण न देइ। तेहिं चाणकभज्जा उल्लग्गिया (उलभिया) तीए सो करणीं गाहिउ तेहिं कहिए भणियं सुहासियं रन्ना तं च अन्नं च दिन्नं। बीयदिवसे चाणको भणइ किस ते दिन्नं राया भणइ तुम्हेहिं पसंसियंति। सो भणइ ण मे पसंसियंति सयारंभपयत्ता कहलोयं पत्तिया वेति। पच्छा ठिउ (विउ) केत्तिया परिसंत्ति ॥

परपाषंडसंस्तवे सौराष्ट्रश्रावकः। सो दुब्भिक्के भिक्खुएहिं समं पयट्टो भत्तं से देंति अन्नया विमूइयाए मओ। चीवरेण पच्छाइओ अविसुद्धोहिणा पासणं भिक्खुगाणं दिग्घवाहाए आहारदाणं। नायगाणं लिंगा। जुगप्पहाणाण कहणं विराहियगुणो त्ति आलोयणं नमोक्कारपढणं पडिबोहो केत्तिया परिसन्ति ॥

अन्ने वि य अइयारा आइसद्देण सूइया इत्थ।
साहंमिअणुवबूहणमथिरीकरणाइया ते उ ॥ ९४ ॥

[अन्ये ऽपि चातिचारा आदिशब्देन सूचिता अत्र।
सार्धर्मिकानुपबृंहणास्थिरीकरणादयस्ते तु ॥ ९४ ॥]

अन्ये ऽपि चातिचारा आदिशब्देन सूचिता अत्र। अत्रैति सम्यक्त्वाधिकारे सम्मत्तस्सइयारा (८९) इत्यादिद्वारगाथायामादि-

शब्देनोल्लिखिता इत्यर्थः । समानधार्मिकानुपबृंहणास्थिरीकरणादयस्ते तु । अनुस्वारो ऽलाक्षणिकः ॥ समानधार्मिको हि सम्यग्दृष्टेः साधुः साध्वी श्रावकः श्राविका च । एतेषां कुशलमार्गप्रवृत्तानामुपबृंहणा कर्तव्या। धन्यस्त्वं पुण्यभाक्त्वं कर्तव्यमेतद्यत्नवतारब्धमिति । तत्राव उपबृंहितव्यः । अनुपबृंहणे ऽतिचारः । एवं सद्धर्मानुष्ठाने विषीदन्[1] धर्म एव स्थिरीकर्तव्यः । अकरणे ऽतिचारः । आदिशब्दात्समानधार्मिकवात्सल्यतीर्थप्रभावनापरिग्रहः । समानधार्मिकस्य ह्यापद्गतोद्धरणादिना वात्सल्यं कर्तव्यं । तदकरणे ऽतिचारः । एवं स्वशक्त्या धर्मकथादिभिः प्रवचने प्रभावना कार्या । तदकरणे ऽतिचार इति ॥ तथा चाह ॥

नो खलु अप्पडिवडिए निच्छयओ मइलिए व समत्ते।
होइ तओ परिणामो जत्तो णुवबृहणाईया ॥ ९५ ॥

[न खल्वप्रतिपतिते निश्चयतो मलिनीकृते वा सम्यक्त्वे ।
भवति सकः परिणामो यतो ऽनुपबृंहणादयः ॥ ९५ ॥]

न खल्विति नैव अप्रतिपतितेऽनपगते निश्चयतो निश्चयनयमतेन मलिनीकृते वा व्यवहारनयमतेन सम्यक्त्वे उपलक्षणे भवति सकः परिणामो जायते भावात्मस्वभावः यतो यस्मात्परिणामादनुपबृंहणादयो भवन्तीति । उक्ताः सम्यक्त्वातिचाराः । एते मुमुक्षुणा वर्जनीयाः । किमिति

जं साहुयारमेयं खिप्पं नो मुक्खसाहगं भणिअं
तह्मा मुक्खट्ठी खलु वज्जिज्ज इमे अईयारे ॥ ९६ ॥

---

१ प्रमादन्.

[यत्सातिचारमेतत्क्षिप्रं न मोक्षसाधकं भणितम् ।
तस्मात् मोक्षार्थी खलु वर्जयेदेतानतिचारान् ॥९६॥

यद्यस्मात्सातिचारं सदोषमेतत्सम्यक्त्वं क्षिप्रं शीघ्रं न मोक्षसाधकं नापवर्गनिर्वर्तकं भणितं तीर्थकरगणधरैः निरतिचारस्यैव विशिष्टकर्मक्षयहेतुत्वात्तस्मात् मोक्षार्थी अपवर्गार्थी खल्विति खलुशब्दोऽवधारणे मोक्षार्थ्येव वर्जयेन्न कुर्यादेतानतिचारान् शङ्कादीनिति ।

आह सुहे परिणामे पइसमयं कम्मखवणओ कह णु
होइ तह संकिलेसो जतो एए अईयारा ॥ ९७ ॥

[आह शुभे परिणामे प्रतिसमयं कर्मक्षपणतः कथं नु ।
भवति तथा संक्लेशो यत एते ऽतिचाराः ॥ ९७ ॥]

एवं सातिचारे सम्यक्त्वे उक्ते सति पर आह । शुभे परिणामे सम्यक्त्वे सति प्रशमसंवेगादिलक्षणे प्रतिसमयं समयं समयं प्रति कर्मक्षपणतः विशिष्टकर्मक्षपणात् मिथ्यादृष्टेः सकाशात्सम्यग्दृष्टिर्विशिष्टकर्मक्षपणक एवेत्युक्तं कथं केन प्रकारेण नु इति क्षेपे भवति तथा संक्लेशो जायते चित्तविभ्रमः यतो यस्मात्संक्लेशादेते शंकादयोऽतिचारा भवन्ति ततश्चानुत्थानमेवैतेषामिति पराभिप्रायः अत्र गुरुर्भणति ॥

नाणावरणादुदया तिव्वविवागा उ भंसणा तेसिं
सम्मत्तपुग्गलाणं तहासहावाउ किं न भवे ॥ ९८ ॥

[ज्ञानावरणादुदयात्तीव्रविपाकात्तु भ्रंशना तेषाम् ।
सम्यक्त्वपुद्गलानां तथास्वभावत्वात् किं न भवति ॥९८॥]

ज्ञानावरणाद्युदयात्किंविशिष्टात्तीव्रविपाकात्, न तु मंदविपाकात्तस्मिन् सत्यपि अतिचारानुपपत्तेः सम्यग्दर्शनिनामपि मन्दविपाकस्य तस्य उदयात्, अतस्तीव्रानुभावादेव भ्रंशना स्वस्वभावच्युतिरूपा तेषां सम्यक्त्वपुद्गलानां तथास्वभावत्वान्मिथ्यात्वदलिकत्वात् जायत इति वाक्यशेषः अतः किं न भवत्यसौ संदेहो यत एतेऽतिचारा भवन्त्येवेत्यभिप्रायः ॥ उक्तं च प्रज्ञापनायां कर्मप्रकृतिपदे बन्धचिन्तायां "कहन्नं भंते जीवे अट्ठकम्मप्पगडीउ बंधइ गोयमा णाणावरणिज्जस्स कम्मस्स उदएणं दंसणावरणिज्जं कम्मं नियच्छइ दंसणावरणिज्जस्स कम्मस्स उदएणं दंसणमोहणिज्जं कम्मं नियच्छइ दंसणमोहणिज्जस्स कम्मस्स उदएणं मिच्छत्तं णियच्छइ मिच्छत्तेणं उदिन्नेणं एवं खलु जीवे अट्ठकम्मपगडीउ बंधइत्ति"। तत्र

नेगंतेणं चिय जे तदुदयभेया कुणंति ते मिच्छं।
तत्तो हुंतिऽइयारा वज्जेयव्वा पयत्तेणं ॥ ९९ ॥

[नैकान्तेनैव ये तदुदयभेदाः कुर्वन्ति तान् मिथ्यात्वम्।
तत्तो भवन्त्यतिचारा वर्जयितव्याः प्रयत्नेन ॥ ९९ ॥]

नैकान्तेनैव न सर्वथैव ये तदुदयभेदा ज्ञानावरणाद्युदयप्रकाराः कुर्वन्ति तान् सम्यक्त्वपुद्गलान् मिथ्यात्वं अपि तु भ्रंशनामात्रमेव तत्तस्मात् ज्ञानावरणाद्युदयाद्भवन्त्यतिचाराः शङ्कादयः ते च वर्जयितव्याः प्रयत्नेनेति ॥

जे नियमवेयणिज्जस्स उदयओ होन्ति, तह कहं तेउ।
वज्जिज्जंति इह खलु, सुद्धेणं जीववीरिएणं ॥१००॥

[ये नियमवेदनीयस्योदयतो भवन्ति तथा कथं पुनस्ते।
वर्जन्ते इह खलु शुद्धेन जीववीर्येण ॥ १०० ॥]

स्यादेतत् ये शङ्कादयो नियमवेदनीयस्य ज्ञानावरणादेरुदयतो भवन्ति, तथा तेन प्रकारेण कथं पुनस्ते वर्जन्ते इह प्रक्रमे प्रस्तावे, खलुशब्दादन्यत्रापि चारित्रादौ तत्कर्मणो अफलत्वप्रसङ्गात्, इति आशङ्क्याह, शुद्धेन जीववीर्येण, कथंचित्प्रादुर्भूतेन प्रशस्तेनात्मपरिणामेनेति ॥ अमुमेवार्थं समर्थयन्नाह ॥

कत्थइ जीवो बलीओ, कत्थइ कम्माइ हुंति बलियाइं।
जम्हा णंता सिद्धा,चिट्ठंति भवंमि वि अणंता॥१०१॥

[क्वचित् जीवो बलीकः क्वचित्कर्माणि भवन्ति बलवन्ति।
यस्मादनन्ताः सिद्धाः तिष्ठन्ति भवेऽप्यनन्ताः १०१]

क्वचिज्जीवो बली स्ववीर्यतः क्लिष्टकर्माभिभवेन सम्यग्दर्शनाद्यवाप्त्या अनन्तानां सिद्धत्वश्रवणात्, क्वचित्कर्माणि भवन्ति बलवन्ति यस्मादेवं वीर्यवन्तोऽपि ततोऽनन्तगुणाः कर्मानुभावतः संसार एव तिष्ठन्ति प्राणिन इति, तथा चाह, यस्मादनन्ताः सिद्धास्तिष्ठन्ति भवेऽप्यनन्ता इति एतदेव प्रकटयति ।

अच्चंतदारुणाइं कम्माइं खवित्तु जीववीरिएणं ।
सिद्धिमणंता सत्ता पत्ता जिणवयणजणिएणं ॥१०२॥

[अत्यन्तदारुणानि कर्माणि क्षपयित्वा जीववीर्येण ।
सिद्धिमनन्ताः सत्त्वाः प्राप्ता जिनवचनजनितेन ॥१०२॥]

अत्यन्तदारुणानि क्लिष्टविपाकानि कर्माणि ज्ञानावरणादीनि क्षपयित्वा जीववीर्येण प्रलयं नीत्वा शुभात्मपरिणामेन सिद्धिं मुक्तिं अनन्ताः सत्त्वाः प्राप्ताः जिनवचनजनितेन जीववीर्येण, इह वैराग्यहेतुः सर्वमेव वचनं जिनवचनमुच्यत इति ।

तत्तो णंतगुणा खलु कम्मेण विणिज्जिआ इह अडंति।
सारीरमाणसाणं दुक्खाणं पारमलहंता ॥ १०३ ॥

[ततो ऽनन्तगुणाः खलु कर्मणा विनिर्जिता इह भ्रटन्ति।
शारीरमानसानां दुःखानां पारमलभमानाः ॥ १०३ ॥]

ततः सिद्धिमुपगतेभ्यः सकाशादनन्तगुणा एव कर्मणा विनिर्जिताः सन्त इह संसारेऽटन्ति, यस्मादनादिमतापि कालेनैकस्य निगोदस्यानन्तभागः सिद्धः, असङ्ख्येयाश्च निगोदा इति, कथमटन्तीत्यत्राह ॥ शारीरमानसानां दुःखानां पारमलभमानाः, तत्र शारीराणि ज्वरकुष्ठादीनि,मानसानीष्टवियोगादीनि,उपसंहरन्नाह॥

तम्हा निच्चसईए बहुमाणेणं च अहिगयगुणंमि ।
पडिवक्खदुगुंछाए परिणइ आलोयणेणं च॥१०४॥

[तस्मान्नित्यस्मृत्या बहुमानेन चाधिकृतगुणे ।
प्रतिपक्षजुगुप्सया परिणत्यालोचनेन च ॥ १०४ ॥]

१ मानसानि विविधदोषादीनि ।

जे नियमवेयणिज्जस्स उदयओ होन्ति, तह कहं तेउ
वज्जिज्जंति इह खलु, सुद्धेणं जीववि रिएणं ॥१००॥

[ये नियमवेदनीयस्योदयतो भवन्ति तथा कथं पुनस्ते।
वर्जन्ते इह खलु शुद्धेन जीववीर्येण ॥ १०० ॥]

स्यादेतत् ये शङ्कादयो नियमवेदनीयस्य ज्ञानावरणादेरुदयतो भवन्ति, तथा तेन प्रकारेण कथं पुनस्ते वर्जन्ते इह प्रक्रमे प्रस्तावे, खलुशब्दादन्यत्रापि चारित्रादौ तत्कर्मणो अफलत्वप्रसङ्गात्, इति आशङ्क्याह, शुद्धेन जीववीर्येण, कथंचित्प्रादुर्भूतेन प्रशस्तेनात्मपरिणामेनेति ॥ अमुमेवार्थं समर्थयमाह ॥

कत्थइ जीवो बलीओ, कत्थइ कम्माइ हुंति बलियाइं।
जम्हा णंता सिद्धा, चिट्ठंति भवंमि वि अणंता॥१०१॥

[कचित् जीवो बलीकः कचित्कर्माणि भवन्ति बलवन्ति।
यस्मादनन्ताः सिद्धाः तिष्ठन्ति भवेऽप्यनन्ताः १०१]

कचिज्जीवो बली स्ववीर्यतः क्लिष्टकर्माभिभवेन सम्यग्दर्शनाद्यवाप्त्या अनन्तानां सिद्धत्वश्रवणात्, कचित्कर्माणि भवन्ति बलवन्ति यस्मादेवं वीर्यवन्तोऽपि ततोऽनन्तगुणाः कर्मानुभावतः संसार एव तिष्ठन्ति प्राणिन इति, तथा चाह, यस्मादनन्ताः सिद्धास्तिष्ठन्ति भवेऽप्यनन्ता इति एतदेव प्रकटयति ।

अच्चंतदारुणाइं कम्माइं खविंसु जीवविरिएणं ।
सिद्धिमणंता सत्ता पत्ता जिणवयणजणिएणं ॥१०२॥

[अत्यन्तदारुणानि कर्माणि क्षपयित्वा जीववीर्येण ।
सिद्धिमनन्ताः सत्त्वाः प्राप्ता जिनवचनजनितेन ॥१०२॥]

अत्यन्तदारुणानि क्लिष्टविपाकानि कर्माणि ज्ञानावरणादीनि क्षपयित्वा जीववीर्येण प्रलयं नीत्वा शुभात्मपरिणामेन सिद्धिं मुक्तिं अनन्ताः सत्त्वाः प्राप्ताः जिनवचनजनितेन जीववीर्येण, इह वैराग्यहेतुः सर्वमेव वचनं जिनवचनमुच्यत इति ।

तत्तो णंतगुणा खलु कम्मेण विणिज्जिआ इह अडंति।
सारीरमाणसाणं दुक्खाणं पारमलहंता ॥ १०३ ॥

[ततो ऽनन्तगुणाः खलु कर्मणा विनिर्जिता इह अटन्ति।
शारीरमानसानां दुःखानां पारमलभमानाः ॥ १०३ ॥]

ततः सिद्धिमुपगतेभ्यः सकाशादनन्तगुणा एव कर्मणा विनिर्जिताः सन्त इह संसारेऽटन्ति, यस्मादनादिमतापि कालेनैकस्य निगोदस्यानन्तभागः सिद्धः, असङ्ख्येयाश्च निगोदा इति, कथमटन्तीत्यत्राह ॥ शारीरमानसानां दुःखानां पारमलभमानाः, तत्र शारीराणि ज्वरकुष्ठादीनि,मानसानीष्टवियोगादीनि[1],उपसंहरन्नाह॥

तम्हा निच्चसईए वहुमाणेणं च अहिगयगुणंमि ।
पडिवक्खदुगंच्छाए परिणइ आलोयणेणं च॥१०४॥

[तस्मान्नित्यस्मृत्या बहुमानेन चाधिकृतगुणे ।
प्रतिपक्षजुगुप्सया परिणत्यालोचनेन च ॥ १०४ ॥]

---

१ मानसानि प्रियविप्रयोगादीनि ।

जे नियमवेयणिज्जस्स उदयओ होन्ति, तह कहं तेउ
वज्जिज्जंति इह खलु, सुद्धेणं जीववि रिएणं ॥१००॥

[ये नियमवेदनीयस्योदयतो भवन्ति तथा कथं पुनस्ते ।
वर्जन्ते इह खलु शुद्धेन जीववीर्येण ॥ १०० ॥]

स्यादेतत् ये शङ्कादयो नियमवेदनीयस्य ज्ञानावरणादेरुदयतो भवन्ति, तथा तेन प्रकारेण कथं पुनस्ते वर्जन्ते इह प्रक्रमे प्रस्तावे, खलुशब्दादन्यत्रापि चारित्रादौ तत्कर्मणो अफलत्वप्रसङ्गात्, इति आशङ्क्याह, शुद्धेन जीववीर्येण, कथंचित्प्रादुर्भूतेन प्रशस्तेनात्मपरिणामेनेति ॥ अमुमेवार्थं समर्थयन्नाह ॥

कत्थइ जीवो बलीओ, कत्थइ कम्माइं हुंति बलियाइं
जम्हा णंता सिद्धा, चिट्ठंति भवंमि वि अणंता॥१०१॥

[क्वचित् जीवो बलीकः क्वचित्कर्माणि भवन्ति बलवन्ति ।
यस्मादनन्ताः सिद्धाः तिष्ठन्ति भवेऽप्यनन्ताः १०१]

क्वचिज्जीवो बली स्ववीर्यतः क्लिष्टकर्माभिभवेन सम्यग्दर्शनाद्यवाप्या अनन्तानां सिद्धत्वश्रवणात्, क्वचित्कर्माणि भवन्ति बलवन्ति यस्मादेवं वीर्यवन्तोऽपि ततोऽनन्तगुणाः कर्मानुभावतः संसार एव तिष्ठन्ति प्राणिन इति, तथा चाह, यस्मादनन्ताः सिद्धास्तिष्ठन्ति भवेऽप्यनन्ता इति एतदेव प्रकटयति ।

अच्चंतदारुणाइं कम्माइं खवित्तु जीववि रिएणं ।
सिद्धिमणंता सत्ता पत्ता जिणवयणजणिएणं ॥१०२॥

[अत्यन्तदारुणानि कर्माणि क्षपयित्वा जीववीर्येण ।
सिद्धिमनन्ताः सत्त्वाः प्राप्ता जिनवचनजनितेन ॥१०२॥]

अत्यन्तदारुणानि क्लिष्टविपाकानि कर्माणि ज्ञानावरणादीनि क्षपयित्वा जीववीर्येण प्रलयं नीत्वा शुभात्मपरिणामेन सिद्धिं मुक्तिं अनन्ताः सत्त्वाः प्राप्ताः जिनवचनजनितेन जीववीर्येण, इह वैराग्यहेतुः सर्वमेव वचनं जिनवचनमुच्यत इति ।

तत्तो णंतगुणा खलु कम्मेण विणिज्जिआ इह अडंति।
सारीरमाणसाणं दुक्खाणं पारमलहंता ॥ १०३ ॥

[ततो ऽनन्तगुणाः खलु कर्मणा विनिर्जिता इह अटन्ति।
शारीरमानसानां दुःखानां पारमलभमानाः ॥ १०३ ॥]

ततः सिद्धिमुपगतेभ्यः सकाशादनन्तगुणा एव कर्मणा विनिर्जिताः सन्त इह संसारेऽटन्ति, यस्मादनादिमतापि कालेनैकस्य निगोदस्यानन्तभागः सिद्धः, असङ्ख्येयाश्च निगोदा इति, कथमटन्तीत्यत्राह ॥ शारीरमानसानां दुःखानां पारमलभमानाः, तत्र शारीराणि ज्वरकुष्ठादीनि,मानसानीष्टवियोगादीनि[1],उपसंहरन्नाह॥

तम्हा निच्चसईए बहुमाणेणं च अहिगयगुणंमि ।
पडिवक्खदुगुंछाए परिणइ आलोयणेणं च॥१०४॥

[तस्मान्नित्यस्मृत्या बहुमानेन चाधिकृतगुणे ।
प्रतिपक्षजुगुप्सया परिणत्यालोचनेन च ॥ १०४ ॥]

---

१ मानसानि प्रियविप्रयोगादीनि ।

जे नियमवेयणिज्जस्स उदयओ होन्ति, तह कहं तेउ
वज्जिज्जंति इह खलु, सुद्धेणं जीववीरिएणं ॥१००॥

[ये नियमवेदनीयस्योदयतो भवन्ति तथा कथं पुनस्ते ।
वर्जन्ते इह खलु शुद्धेन जीववीर्येण ॥ १०० ॥]

स्यादेतत् ये शङ्कादयो नियमवेदनीयस्य ज्ञानावरणादेरुदयतो भवन्ति, तथा तेन प्रकारेण कथं पुनस्ते वर्जन्ते इह प्रक्रमे प्रस्तावे, खलुशब्दादन्यत्रापि चारित्रादौ तत्कर्मणो अफलत्वप्रसङ्गात्, इति आशङ्क्याह, शुद्धेन जीववीर्येण, कथंचित्प्रादुर्भूतेन प्रशस्तेनात्मपरिणामेनेति ॥ अमुमेवार्थं समर्थयन्नाह ॥

कत्थइ जीवो बलीओ, कत्थइ कम्माइ हुंति बलियाइं।
जम्हा णंता सिद्धा,चिट्ठंति भवंमि वि अणंता॥१०१॥

[कचित् जीवो बलीकः कचित्कर्माणि भवन्ति बलवन्ति।
यस्मादनन्ताः सिद्धाः तिष्ठन्ति भवेऽप्यनन्ताः १०१]

कचिज्जीवो बली स्वर्यीर्यतः क्लिष्टकर्माभिभवेन सम्यग्दर्शनाद्यवाप्या अनन्तानां सिद्धत्वश्रवणात्, कचित्कर्माणि भवन्ति बलवन्ति यस्मादेवं वीर्यवन्तोऽपि ततोऽनन्तगुणाः कर्मानुभावतः संसार एव तिष्ठन्ति प्राणिन इति, तथा चाह, यस्मादनन्ताः सिद्धास्तिष्ठन्ति भवेऽप्यनन्ता इति एतदेव प्रकटयति ।

अच्चंतदारुणाइं कम्माइं खविंसु जीववीरिएणं ।
सिद्धिमणंता सत्ता पत्ता जिणवयणजणिएणं ॥१०२॥

[अत्यन्तदारुणानि कर्माणि क्षपयित्वा जीववीर्येण ।
सिद्धिमनन्ताः सत्त्वाः प्राप्ता जिनवचनजनितेन ॥१०२॥]

अत्यन्तदारुणानि क्लिष्टविपाकानि कर्माणि ज्ञानावरणादीनि क्षपयित्वा जीववीर्येण प्रलयं नीत्वा शुभात्मपरिणामेन सिद्धिं मुक्तिं अनन्ताः सत्त्वाः प्राप्ताः जिनवचनजनितेन जीववीर्येण, इह वैराग्यहेतुः सर्वमेव वचनं जिनवचनमुच्यत इति ।

तत्तो णंतगुणा खलु कम्मेण विणिज्जिआ इह अडंति।
सारीरमाणसाणं दुक्खाणं पारमलहंता ॥ १०३ ॥

[ततो ऽनन्तगुणाः खलु कर्मणा विनिर्जिता इह अटन्ति।
शारीरमानसानां दुःखानां पारमलभमानाः ॥ १०३ ॥]

ततः सिद्धिमुपगतेभ्यः सकाशादनन्तगुणा एव कर्मणा विनिर्जिताः सन्त इह संसारेऽटन्ति, यस्मादनादिमतापि कालेनैकस्य निगोदस्यानन्तभागः सिद्धः, असङ्ख्येयाश्च निगोदा इति, कथमटन्तीत्यत्राह ॥ शारीरमानसानां दुःखानां पारमलभमानाः, तत्र शारीराणि ज्वरकुष्ठादीनि, मानसानीष्टवियोगादीनि[1], उपसंहरन्नाह॥

तम्हा निच्चसईए बहुमाणेणं च अहिगयगुणंमि ।
पडिवक्खदुगंच्छाए परिणइ आलोयणेणं च॥१०४॥

[तस्मान्नित्यस्मृत्या बहुमानेन चाधिकृतगुणे ।
प्रतिपक्षजुगुप्सया परिणत्यालोचनेन च ॥ १०४ ॥]

---

१ मानसानि प्रियविप्रयोगादीनि ।

यस्मादेवं तस्मान्नित्यस्मृत्या सदा अविस्मरणेन बहुमानेन च भावप्रतिबन्धेन चाधिकृतगुणे सम्यक्त्वादौ तथा प्रतिपक्षजुगुप्सया मिथ्यात्वाद्युद्वेगेन, परिणत्यालोचनेन च तेषामेव मिथ्यात्वादीनां दारुणफला एते इति विपाकालोचनेन चेति ॥

तित्थंकरभत्तीए, सुसाहुजणपज्जुवासणाए य ।
उत्तरगुणसद्धाए, अपमाओ होइ कायव्वो ॥ १०५ ॥

[तीर्थकरभक्त्या सुसाधुजनपर्युपासनया च ।
उत्तरगुणश्रद्धयाप्रमादो भवति कर्तव्यः ॥ १०५ ॥]

तथा तीर्थकरभक्त्या परमगुरुविनयेन, सुसाधुजनपर्युपासनया च भावसाधुसेवनया, तथोत्तरगुणश्रद्धया च सम्यक्त्वादिषु मूलगुणताभिलाषेण तेषु सत्सु महाव्रताभिलाषेणेति भावः एवंभूतेन प्रकारेणाप्रमादो भवति कर्तव्य एवमप्रमादवान्नियमकर्मणोऽपनयति शक्तिमित्येष शुद्धस्य जीववीर्यस्य व्यापारः इति ॥

सांप्रतं द्वादशप्रकारं श्रावकधर्ममुपन्यस्यता यानि तान्यभिधित्सुराह ॥

पंच उ अणुव्वयाइं थूलगपाणिवहविरमणाईणि ।
तत्थ पढमं इमं खलु पन्नत्तं वीयरागेहिं ॥ १०६ ॥

[पञ्च त्वणुव्रतानि स्थूलप्राणवधविरमणादीनि ।
तत्र प्रथमं इदं खलु प्रज्ञप्तं वीतरागैः ॥ १०६ ॥]

पञ्च त्वणुव्रतानि, तुरेवकारार्थः, पञ्चैव, अणुत्वमेषां सर्वविरति-

लक्षणमहाव्रतापेक्षया, तथा चाह, स्थूरप्राणवधविरमणादीनि स्थूरकप्राणिप्राणवधविरमणमादिशब्दात्स्थूरमृषावादादिपरिग्रहः, तत्र तेष्वणुव्रतेषु प्रथममाद्यमिदं खल्विति इदमेव वक्ष्यमाणलक्षणं, शेषाणामस्यैव वस्तुत उत्तरगुणत्वात्, प्रज्ञप्तं वीतरागैः प्ररूपितमर्हद्भिरिति ॥

थूलगपाणिवहस्साविरई, दुविहो अ सो वहो होइ।
संकप्पारंभेहि य, वज्जइ संकप्पओ विहिणा ॥१०७॥

[स्थूरप्राणवधस्य विरतिः द्विविधश्चासौ वधो भवति।
संकल्पारम्भाभ्यां वर्जयति संकल्पतः विधिना॥१०७॥]

स्थूरकप्राणवधस्य विरतिः, स्थूरा एव स्थूरका द्वीन्द्रियादयस्तेषां प्राणाः शरीरेन्द्रियोच्छ्वासायुर्बललक्षणास्तेषां वधः जिघांसनं तस्य विरतिर्निवृत्तिरित्यर्थः, द्विविधश्चासौ वधो भवति, कथं संकल्पारम्भाभ्यां, तत्र व्यापादनाभिसंधिः संकल्पः, कृष्यादिकस्त्वारम्भः, तत्र वर्जयति संकल्पतः, परिहरति असौ श्रावकः प्राणवधं संकल्पेन, न त्वारम्भतोऽपि, तत्र नियमात् प्रवृत्तेः, विधिना प्रयत्नोपेतेन वर्जयति न तु यथाकथंचिदिति, स चायं विधिः ॥

उवउत्तो गुरुमूले संविग्गो इत्तरं व इयरं वा।
अणुदियहमणुसरंतो पालेइ विसुद्धपरिणामो॥१०८॥

[उपयुक्तो गुरुमूले संविग्नो इत्वरं इतरद्वा।
अनुदिवसमनुस्मरन् पालयति विशुद्धपरिणामः॥१०८॥]

उपयुक्तोऽन्तःकरणेन समाहितो, गुरुमूले आचार्यसन्निधौ, संविग्नो मोक्षसुखाभिलाषी न तु रिद्धिकाम इत्वरं चातुर्मासादिकालावधिनो, इतरद्वा यावत्कथिकमेव, प्राणवधं वर्जयतीति वर्तते, एवं वर्जयित्वानुदिवसमनुस्मरन्, स्मृतिमूलो धर्म इति कृत्वा, पालयति विशुद्धपरिणामः, न पुनस्तत्र चेतसापि प्रवर्तत इति॥

अत्राह

देसविरइपरिणामे सइ किं गुरुणा फलस्स भावाओ।
उभयपलिमंथदोसो निरत्थओ मोहलिंगं तु॥१०९॥

[देशविरतिपरिणामे सति किं गुरुणा फलस्याभावात्।
उभयपलिमन्थदोषः निरर्थको मोहलिंगं तु॥ १०९॥]

इह श्रावको यदाणुव्रतं प्रतिपद्यते तदास्य देशविरतिपरिणामः स्याद्वा न वा किं चात उभयथापि दोषः तमेवाह देशविरतिपरिणामे सति, स्वत एव तथाविधाणुव्रतरूपाध्यवसाये सति, किं गुरुणा, किमाचार्येण यन्मंनिधौ सद्गृह्यते कुतः फलस्याभावात्तत्संनिधायपि प्रतिपन्नः स एव फललाभः स च स्वत एव संजात इत्यफलो गुरुमार्गणा किं च उभयपलिमन्थदोषः तथाविधाणुव्रतरूपाध्यवसाये सत्येव गुरुसंनिधौ तत्प्रतिपत्त्यभ्युपगमे उभयोराचार्यशिष्ययोर्मुहूर्ताभ्यासारदोषः स च निरर्थको मोहलिंग एव न हि अमूढस्य प्रयोजनमन्तरेण प्रवृत्तिरिति॥ द्वितीयं विकल्पमुररीकृत्याह।

१ ख ग ङ°पत्ता

दुन्हवि य मुसावाओ तयभावे पालणस्स वि अभावो।
न य परिणामेण विणा इच्छिज्जइ पालणं समए११०

[द्वयोरपि मृषावादः तदभावे पालनस्याप्यभावः।
न च परिणामेन विना इष्यते पालनं समये ॥ ११० ॥]

यदि न देशविरतिपरिणाम एव तर्हि द्वयोरपि प्रतिपत्तृप्रतिपादकयोः शिष्याचार्ययोः मृषावादः शिष्यस्यासदभ्युपगमाद्गुरोश्चासदभिधानादिति किं च तदभावे देशविरतिपरिणामस्याभावे पालनस्यापि व्रतसंरक्षणस्याप्यभावः एतदेव स्पष्टयति न च नैव परिणामेनानन्तरोदितेन विना इष्यतेऽभ्युपगम्यते पालनं संरक्षणं, व्रतस्येति प्रक्रमाद्गम्यते, समये सिद्धान्ते, परमार्थेन तस्यैव व्रतत्वादिति। एवं पराभिप्रायमाशङ्क्य, पक्षद्वयेऽप्यदोष इत्यावेदयन्नाह

संते विय परिणामे गुरुमूलपवज्जणंमि एस गुणो।
दढया आणाकरणं कम्मखओवसमवुड्ढी य ॥१११॥

[सत्यपि च परिणामे गुरुमूलप्रतिपादने एष गुणः।
दृढता आज्ञाकरणं कर्मक्षयोपशमवृद्धिश्च ॥ १११ ॥]

सत्यपि च परिणामे देशविरतिरूपे, गुरुमूलप्रतिपादने आचार्यसन्निधौ प्रतिपत्तिकरणे, एष गुण एषोऽभ्युपायः, यदुत दृढता तस्मिन्नेव गुणे दार्ढ्यं, तथाज्ञाकरणं अर्हदाज्ञासंपादनं, यतस्तस्यैव उपदेशो गुरुसन्निधौ व्रतग्रहणं कार्यमिति, तथा कर्मक्षयोपशमवृद्धिश्च तथाकरणे दार्ढ्याज्ञासंपादनशुभपरिणामतः अधिकतरक्षयोपशमोपपत्तेरिति ॥

उपयुक्तोऽन्तःकरणेन समाहितो, गुरुमूले आचार्यसन्निधौ, संविग्नो मोक्षसुखाभिलाषी न तु रिद्धिकाम इत्वरं चातुर्मासादिकालावधिनो, इतरद्वा यावत्कथिकमेव, प्राणवधं वर्जयतीति वर्तते, एवं वर्जयित्वानुदिवसमनुस्मरन्, स्मृतिमूलो धर्म इति कृत्वा, पालयति विशुद्धपरिणामः, न पुनस्तत्र चेतसापि प्रवर्तत इति ॥

अत्राह

देसविरइपरिणामे सइ किं गुरुणा फलस्स भावाओ।
उभयपलिमंथदोसो निरत्थओ मोहलिंगं तु॥१०९॥

[देशविरतिपरिणामे सति किं गुरुणा फलस्याभावात्।
उभयपलिमन्थदोषः निरर्थको मोहलिंगं तु ॥ १०९ ॥]

इह श्रावको यदाणुव्रतं प्रतिपद्यते तदास्य देशविरतिपरिणामः स्याद्वा न वा किं चात उभयथापि दोषः तमेवाह देशविरतिपरिणामे सति, स्वत एव तथाविधाणुव्रतरूपाध्यवसाये सति, किं गुरुणा, किमाचार्येण यत्संनिधौ तद्गृह्यते कुतः फलस्याभावात्तत्संनिधावपि प्रतिपत्तुः स एव फललाभः स च स्वत एव संजात इत्यफलो गुरुमार्गणा किं च उभयपलिमन्थदोषः तथाविधाणुव्रतरूपाध्यवसाये सत्येव गुरुसंनिधौ तत्प्रतिपत्त्यभ्युपगमे उभयोराचार्यशिष्ययोर्मुधाव्यापारदोषः स च निरर्थको मोहलिंग एव न हि अमूढस्य प्रयोजनमन्तरेण प्रवृत्तिरिति ॥ द्वितीयं विकल्पमुररीकृत्याह ।

---

१ काल विधिना

दुन्हवि य मुसावाओ तयभावे पालणस्स वि अभावो।
न य परिणामेण विणा इच्छिज्जइ पालणं समए११०

[द्वयोरपि मृषावादः तदभावे पालनस्याप्यभावः।
न च परिणामेन विना इष्यते पालनं समये ॥ ११० ॥]

यदि न देशविरतिपरिणाम एव तर्हि द्वयोरपि प्रतिपत्तृप्रतिपादकयोः शिष्याचार्ययोः मृषावादः शिष्यस्यासदभ्युपगमाद्गुरोश्चासदभिधानादिति किं च तदभावे देशविरतिपरिणामस्याभावे पालनस्यापि व्रतसंरक्षणस्याप्यभावः एतदेव स्पष्टयति न च नैव परिणामेनानन्तरोदितेन विना इष्यतेऽभ्युपगम्यते पालनं संरक्षणं, व्रतस्येति प्रक्रमाद्गम्यते, समये सिद्धान्ते, परमार्थेन तस्यैव व्रतत्वादिति। एवं पराभिप्रायमाशङ्क्य, पक्षद्वयेऽप्यदोष इत्यावेदयन्नाह

संते विय परिणामे गुरुमूलपवज्जणंमि एस गुणो।
दृढया आणाकरणं कम्मखओवसमवुड्ढी य॥१११॥

[सत्यपि च परिणामे गुरुमूलप्रतिपादने एष गुणः।
दृढता आज्ञाकरणं कर्मक्षयोपशमवृद्धिश्च ॥ १११ ॥]

सत्यपि च परिणामे देशविरतिरूपे, गुरुमूलप्रतिपादने आचार्यसन्निधौ प्रतिपत्तिकरणे, एष गुण एषोऽभ्युदयः, यदुत दृढता तस्मिन्नेव गुणे दार्ढ्यं, तथाज्ञाकरणं अर्हदाज्ञासंपादनं, यतस्तस्यैव उपदेशो गुरुसन्निधौ व्रतग्रहणे कार्यमिति, तथा कर्मक्षयोपशमवृद्धिश्च तथाकरणे दार्ढ्याज्ञासंपादनशुभपरिणामतः अधिकतरक्षयोपशमोपपत्तेरिति ॥

इय अहिए फलभावे न होइ उभयपलिमंथदोसो उ।
तयभावम्मि वि दुन्हवि न मुसावाओवि गुणभावा११२
[इय अधिके फलभावे न भवति उभयपलिमन्थदोषः।
तद्भावेऽपि द्वयोरपि न मृषावादोऽपि गुणभावात्[1]११२]

इय एवमधिके फलभावे पूर्वावस्थातः अभ्यधिकतरायां फलसत्तायां, न भवति न जायते, उभयपलिमन्थदोषः शिष्याचार्ययोर्मुधाव्यापारदोष इत्यर्थः। एवं परिहृतः प्रथमो विकल्पः ॥ द्वितीयमधिकृत्याह । तद्भावेऽपि देशविरतिपरिणामाभावेऽपि, द्वयोरपि प्रत्याख्यातृप्रत्याख्यापयित्रोर्गुरुशिष्ययोर्न मृषावादोऽपि प्राक्चोदितः कुतो गुणभावाद्गुणसंभवादिति। गुणभावमेवाह ॥

तग्गहणउ चिय तओ जायइ कालेण असठभावस्स।
इयरस्स न देयं चिय सुद्धो छलिओ वि जइ असढो११३
[तद्ग्रहणत एव तको जायते कालेनाशठभावस्य।
इतरस्य न देयमेव शुद्धः छलितोऽपि यतिरशठः११३]

तद्ग्रहणत एव विधिना गुरुसन्निधौ व्रतग्रहणादेव तको जायते कालेन असौ देशविरतिपरिणामो भवति कालेन तत् गुरुसन्निधिकारणत्वादित्यर्थः। किंविशिष्टस्य अशठभावस्य श्राद्धस्य सत्त्वस्य शठविषयं दोषमाशङ्क्याह, इतरस्य शठस्य न देयमेव, व्रतं अस्थानदाने भगवदाशातनाप्रसङ्गात्, तदज्ञानविषयं दोषमाशङ्क्याह, शुद्धः छलितोऽपि यतिरशठः छद्मस्थप्रत्यपेक्षणया कृतयत्नो,

१ तत्कारणत्वादित्यर्थ

मायाविना कथंचिद्भ्रंसितोऽपि विप्रतारितोऽप्यार्जवः साधुरदोषवानेव, आज्ञानतिक्रमादिति ॥

अपरस्त्वाह ।

थूलगपाणाइवायं पच्चरकंतस्स कह न इयरंमि ।
होइ णुमइ जइस्स वि तिविहेण तिदंडविरयस्स११४

[स्थूरकप्राणातिपातं प्रत्याचक्षाणस्य कथं नेतरस्मिन् ।
भवत्यनुमतिर्यतेः त्रिविधेन त्रिदण्डाविरतस्य ॥११४॥]

स्थूरकप्राणातिपातं द्वीन्द्रियादिप्राणजिघांसनं प्रत्याचक्षाणस्य तद्विषयां निवृत्तिं कारयतः कथं नेतरस्मिन् कथं न सूक्ष्मप्राणातिपाते भवत्यनुमतिर्यतेर्भवत्येवेत्यभिप्रायः, किंविशिष्टस्य यतेस्त्रिविधेन त्रिदण्डविरतस्य मनसा वाचा कायेन सावद्यं प्रति कृतकारितानुमतिविरतस्य, तथा चान्यत्रापि निषिद्ध एव यतेरेवं जातीयोऽर्थः, यत उक्तं "माणुमती केरिसा तुम्हे"त्ति ॥ अत्र गुरुराह

अविहीए होइ चिय विहीइ नो सुयविसुद्धभावस्स ।
गाहावइसुअचोरग्गहणमोअणा इत्थ नायं तु॥११५॥

[अविधिना भवत्येव विधिना न श्रुतविशुद्धभावस्य ।
गृहपतिसुतचोरग्रहणमोचनं अत्र ज्ञातं तु ॥ ११५ ॥]

अविधिना भवत्येव अणुव्रतग्रहणकाले सम्यगनाख्याय संसारासारतास्यापनपुरःसरं साधुधर्मं प्रमादतोऽणुव्रतानि यच्छतो भवत्येवानुमतिः, विधिना पुनः साधुधर्मकथनपुरःसरेण नेति न भव-

त्यनुमतिः, किंविशिष्टस्य श्रुतविशुद्धभावस्य तत्वज्ञानान्मध्यस्थस्येत्यर्थः, अस्मिन्नेवार्थे दृष्टान्तमाह, गृहपतिसुतचोरग्रहणमोचना अत्र ज्ञातमिह उदाहरणमित्यर्थः, तच्चेदं

वंसतउरं नगरं, जियसत्तू राया धारिणी देवी दण्डा तिसएण परितुट्ठो से भत्ता, भणिया य णेण, भण किं ते पियं कीरउ, तीए भणियं, कोमुदीए अंतेउराणं जहिच्छा पयारेण निसि ऊस्सवपसाउत्ति। पडिसुयमणेंण। समागओ सो दियहो। कारावियं च अणेण घोसणं, जहा जो एत्थ अज्ज पुरिसो वसिही तस्स मए सारीरो णिग्रहो कायव्वो, उग्गदंडो य रायत्ति। ततो णिग्गया सवे पुरिसा णवरमेगस्स सेट्ठिणो छ पुत्ता संभवहारवावडयाए लहु, ण णिग्गया। ढक्किया पओलिओ। भएण तत्थेव, खुसिया, वत्तो रयणीऊसवो। बीयदिवहे य पउत्ता चारिया गवेसह को ण णिग्गउत्ति। तेहिं निउणबुद्धीए गवेसिऊण साहियं रन्नो, अमुगसेट्ठिस्स छसुया ण णिग्गयत्ति। कुविओ राया भणियं चाणेणं वावाएह ते दुरायारे। गहिया ते रायपुरिसेहिं। एयं वायं णिऊण णयरइसमीवं समागओ तेसिं पिया। विन्नतो य णेण राया देव खमसु एगमवराहं, मुयह एकवारं मम एए। मा अन्नो वि एवं काहित्ति ण मुयई राया। पुणो पुणो भन्नमाणेण मा कुलखओ भवउत्ति मुक्को से जेट्ठपुत्तो, वायाइया इयरे। ण य समभावस्स सव्वपुत्तेसु सेट्ठिस्स सेसवावायणेसु अणुमई त्ति॥ एस दिट्ठंतो इमो एयस्स उवणओ। रायातुल्लो सावगो, वायाइज्जमाणवणियतुल्ला जीवणिकाया, पियतुल्लो साहू, विन्नवणतुल्ला अ-

णुवयगहणकाले साधुधम्मदेसणा । एवं च असुयणे वि सावगस्स ण साधुस्स दोसो ॥

न चैतत्स्वमनीषिकया परिकल्पितं उक्तं च सूत्रकृताङ्गे "गाहावइसुयचोरग्गहणविमोक्खणयाएत्ति" एतत्संग्राहकं चेदं गाथात्रयम् ॥

देवीतुट्ठो राया ओरोहस्स निसि ऊसवपसाओ।
घोसण नरनिग्गमणं छन्नणियसुयाणनिखेवो॥११६॥

[देव्यै तुष्टो राजा अन्तःपुरस्य निशि उत्सवप्रसादः।
घोषणनरनिर्गमनं षड्गणिकसुतानामनिक्षेपः ॥११६॥]

चारियकहिए वज्झा मोएइ पिया न मिल्लइ राया।
जिट्ठसुयणे समस्सउ नाणुमई तस्स सेसेसु ॥११७॥

[चारिककथिते वध्या मोचयति पिता न मुञ्चति राजा।
ज्येष्ठमोचने समस्य तु नानुमतिः तस्य शेषेषु ॥ ११७ ॥]

राया सड्ढो वणिया काया साहू य तेसि पियतुल्लो।
मोयइ अविसेसेणं न मुयइ सो तस्स किं इत्थ११८

[राजा श्राद्धः वणिक्पुत्राः कायाःसाधुश्च तेषां पितृतुल्यः
मोचयति अविशेषेण न मुञ्चति स, तस्य किमत्र॥११८॥]

एतद्गतार्थमिति न व्याख्यायते णवरमोरोहो अंतेउरं भण्णइ ॥

सांप्रतमन्यद्वादस्थानकं

तसपाणघायविरई तत्तो थावरगयाण वहभावा।
नागरगवहनिवित्तीनायाओ केइ नेच्छंति ॥ ११९ ॥

[त्रसप्राणघातविरतिं ततः स्थावरगतानां वधभावात्।
नागरकवधनिवृत्तिज्ञाततो केचन नेच्छन्ति ॥ ११९ ॥]

त्रसप्राणघातविरतिं द्वीन्द्रियादिप्राणव्यापत्तिनिवृत्तिं ततस्तस्मात्रसकायात् स्थावरगतानां पृथिव्यादिसमुत्पन्नानां वधभावाद्व्यापत्तिसंभवान्नागरकवधनिवृत्तिज्ञाततो नागरकवधनिवृत्त्युदाहरणेनकेचन वादिनो नेच्छन्ति नाभ्युपगच्छन्तीति गाथाक्षरार्थः,भावार्थमाह॥

पच्चक्खायंमि इहं नागरगवहम्मि निग्गयं पि तओ।
तं वहमाणस्स न किं जायइ वहविरइभंगो उ॥१२०॥

[प्रत्याख्याते इह नागरकवधे निर्गतमपि ततः ।
तं घ्नतो न किं जायते वधविरतिभङ्गः ॥ १२० ॥]

प्रत्याख्याते इह परित्यक्ते अत्र कस्मिन्नागरकजिघांसने निर्गतमपि निःक्रान्तमपि ततो नगरात् तं नागरकं घ्नतो व्यापादयतोऽन्यत्रापि न किं जायते वधविरतिभङ्गः प्रत्याख्यानभङ्गो जायत एवेति। इत्थं दृष्टान्तमभिधाय अधुना दार्ष्टान्तिकयोजनां कुर्वन्नाह॥

इय अविसेसा तसपाणघायविरइं काउ तं ततो ।
थावरकायमणुगयं वहमाणस्स धुवो भंगो ॥१२१॥

[इय अविशेषात् त्रसप्राणघातविरतिं कृत्वा तं ततः ।
स्थावरकायमनुगतं घ्नतो ध्रुवो भङ्गः ॥ १२१ ॥]

इय एवमविशेषात्सामान्येनैव त्रसप्राणघातविरतिमपि कृत्वा

---

१ प्राणातिपात०

तं त्रसं ततस्त्रसकायात् द्वीन्द्रियादिलक्षणात् स्थावरकायमनुगतं विचित्रकर्मपरिणामात्पश्चात्पृथिव्यादिपूत्पन्नं मतो व्यापादयतो ध्रुवो भङ्गोऽवश्यमेव भङ्गो निवृत्तेरिति। संभवति चैतत्त्रसोऽपि मृत्वा श्रावकारम्भविषये स्थावरः प्रत्यागच्छति स च तं व्यापादयतीति ततश्च विशेष्यप्रत्याख्यानं कर्तव्यमनवद्यत्वादिति। आह च

तसभूयपाणविरई तब्भावंमि वि न होइ भंगाय।
खीरविगइपच्चखाणे दहियपरिभोगकिरिय व्व १२२

[त्रसभूतप्राणविरतिः तद्भावे ऽपि न भवति भङ्गाय।
क्षीरविकृतिप्रत्याख्यातृदधिपरिभोगक्रियावत् ॥१२२॥]

त्रसभूतप्राणविरतिस्त्रसपर्यायाध्यासितप्राणवधनिवृत्तिः तद्भावेऽपि स्थावरगतव्यापत्तिभावेऽपि न भवति प्रत्याख्यानभङ्गाय विशेष्यकृतत्वात् किंवत् क्षीरविकृतिप्रत्याख्यातृदधिपरिभोगक्रियावत् न हि क्षीरविकृतिप्रत्याख्यातुर्दधिपरिभोगक्रिया प्रत्याख्यानभङ्गाय क्षीरस्यैव दधिरूपत्वापत्तावपि विशेष्यप्रत्याख्यानादिति[1]॥ उपसंहरन्नाह॥

तम्हा विसेसिऊणं इय विरई इत्थ होइ कायव्वा।
अब्भक्खाणं दुन्ह वि इय करणे नावगच्छंति॥१२३॥

[तस्माद्विशिष्य इय विरतिरत्र भवति कर्तव्या।
अभ्याख्यानं द्वयोरपि इयकरणे नावगच्छन्ति॥१२३॥]

यस्मादेवं तस्माद्विशिष्य भूतशब्दोपादानेन इय एवं विरति-

---

१ प्रत्याख्यानत्वादिति

निवृत्तिरत्र प्राणातिपाते भवति कर्तव्या अन्यथा भङ्गप्रसङ्गात् । इति पूर्वपक्षः । अत्रोत्तरमाह । अभ्याख्यानं तद्गुणशून्यत्वेऽपि तद्गुणाभ्युपगमलक्षणं द्वयोरपि प्रत्याख्यातृप्रत्याख्यापयित्रोराचार्यश्रावकयोः इयकरणे भूतशब्दसमन्वितप्रत्याख्यानासेवने नावगच्छन्ति नावबुध्यन्ते पूर्वपक्षवादिन इति ॥ तथा चाह ॥

ओवंमे तादत्थे व हुज्ज एसित्थ भूयसद्दो त्ति ।
उभओ पओगकरणं न संगयं समयनीईए ॥१२४॥

[औपम्ये तादर्थ्ये वा भवेदेषोऽत्र भूतशब्द इति ।
उभयथा प्रयोगकरणं न संगतं समयनीत्या ॥ १२४ ॥]

औपम्ये तादर्थ्ये वा भवेदेषोऽत्र प्रत्याख्यानविधौ भूतशब्द इति । उभयथापि प्रयोगकरणमस्य न संगतं समयनीत्या सिद्धान्तव्यवस्थयेति गाथाक्षरार्थः ॥ भावार्थमाह ।

ओवंमे देसो खलु एसो सुरलोयभूय मो एत्थ ।
देसु च्चिय सुरलोगो न होइ एवं तसा तेवि ॥१२५॥

[औपम्ये देशः खल्वेष सुरलोकभूत एव अत्र ।
देश एव सुरलोको न भवति एवं त्रसास्तेऽपि ॥१२५॥]

औपम्ये उपमाभावे भूतशब्दप्रयोगो यथा देशः खल्वेष लाटदेशादिः ऋध्यादिगुणोपेतत्वात्सुरलोकोपमः मो इत्यवधारणार्थो निपातः सुरलोकभूत एव अत्रास्मिन् पक्षे देश एव सुरलोको न

---

१ अत्रापि त्रेषि

भवति तेनोपमीयमानत्वादेतस्य एवं प्रसक्ते ऽपि पङ्क्तिपदा निवृत्तिः विरतं ते ऽपि त्रसा न भवन्ति त्रसभूतत्वात्त्रसैरुपमीयमानत्वादिति। ततः विशिनष्टि ॥

अत्तसयणनिवित्तीए थावरघाए वि पावए तस्स।
पढविरइभंगदोसो अत्तसत्ता थावराणं तु ॥ १२६ ॥

[अत्रसवधनिवृत्तौ स्थावरघाते ऽपि प्राप्नोति तस्य।
पृथिवीरतिभङ्गदोषो ऽत्रसत्वात्स्थावराणां तु ॥१२६॥]

इक्षुन्यायादत्रसवधनिवृत्तौ तस्यां स्थावरघातेऽपि कृते प्राप्नोति तस्य निवृत्तिकर्तुः पृथिवीविरतिभङ्गदोषः पुनः अत्रसत्वात्स्थावराणामेव अत्रसाश्च त्रसभूता भवन्तीति अवसितः औपम्यपक्षः। सांप्रतं सादृश्यपक्षमाह।

सादस्से पुण एसो सीईभूयमुदगंति निद्दिट्ठो।
तज्जाइअणुच्छेया न य सो तसथावराणं तु ॥१२७॥

[सादृश्ये पुनरेष शीतीभूतमुदकमिति निर्दिष्टः।
तज्जात्यनुच्छेदात् न चासौ त्रसस्थावरयोस्तु ॥१२७॥]

सादृश्ये पुनस्तदर्थभावे पुनरेष भूतशब्दप्रयोगः शीतीभूतमुदकमुष्णं सत्पर्यायान्तरमापन्नमिति निर्दिष्टस्तल्लक्षणज्ञैः एवं प्रतिपादितः तज्जात्यनुच्छेदात् अत्रापि तदुदकजात्यनुच्छेदेनैवोष्णं सच्छीतीभूतं न चासौ जात्यनुच्छेदस्त्रसस्थावरयोर्भिन्नजातित्वादिति ॥

सिय जीवजाइमहिगिच्च अत्थि किं तीइ अपडिकुट्ठाए।
भूअग्गहणेवि एवं दोसो अणिवारणिज्जो ओ ॥१२८॥

[स्याज्जीवजातिमधिकृत्यास्ति किं तया अप्रतिकुष्टया।
भूतग्रहणे ऽप्येवं दोषो ऽनिवारणीय एव ॥ १२८ ॥]

स्याज्जीवजातिमधिकृत्यास्ति जात्यनुच्छेदः द्वयोरपि जीवत्वानुच्छेदादित्याशङ्क्याह किं तया जीवजात्या अप्रतिकुष्टया अनिषिद्धया न तेन जीवजातिवधविरतिः कृता येन सा चिन्त्यते ततश्च भूतग्रहणेऽप्येवमुक्तन्यायात् दोषोऽनिवारणीय एवेति, किं च॥

तसभूयावि तसच्चिय जं ता किं भूयसद्दग्गहणेणं।
तब्भावओ अ सिद्धे हंत विसेसत्थभावम्मि ॥१२९॥

[त्रसभूता अपि त्रसा एव यत्तत्किं भूतशब्दग्रहणेन।
तद्भावत एव सिद्धे हंत विशेषार्थभावे ॥ १२९ ॥]

त्रसभूता अपि वस्तुस्थित्या त्रसा एव नान्ये यद्यस्मादेवं तत्तस्मात्किं भूतशब्दग्रहणेन न किंचिदित्यर्थः,तद्भावत एव त्रसभावत एव सिद्धे हन्त विशेषार्थभावे त्रसपर्यायलक्षणे, न हि त्रसपर्यायशून्यस्य त्रसत्वमिति॥ किं च।

थावरसंभारकडेण कम्मणा जं च थावरा भणिया।
इयरेणं तु तसा खलु इत्तो चिय तेसि भेओउ॥१३०॥

[स्थावरसंभारकृतेन कर्मणा यच्च स्थावरा भणिताः।
इतरेण तु त्रसाः खलु अत एव तयोर्भेदः ॥ १३० ॥]

स्थावरसंभारकृतेन पृथिव्यादिनिचयनिर्वर्तितेन कर्मणा यच्च यस्माच्च स्थावरा भणिताः परममुनिभिरिति गम्यते इतरेण तु त्रससंभारकृतेन तुरवधारणे त्रससंभारकृतेनैव त्रसाः खल्विति त्रसा एव खलुशब्दस्यावधारणार्थत्वात् अत एवास्मादेव निमित्तभेदात्तयोस्त्रसस्थावरयोर्भेदः, तस्मिन्सति अनर्थको भूतशब्द इति ।

इदानीं दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाह ॥

नागरगंमि वि गामाइसंकमे अवगयंमि तब्भावे ।
नत्थि हु वहे वि भंगो अणवगए किमिह गामेण१३१

[नागरकेऽपि ग्रामादिसंक्रमे अपगते तद्भावे ।
नास्त्येव वधेऽपि भङ्गोऽनपगते किमिह ग्रामेण ॥१३१॥]

नागरकेऽपि दृष्टान्ततयोपन्यस्त इदं चिन्त्यते । ग्रामादिसंक्रमे तस्य किमसौ नागरकभावोऽपैति वा न वा । यद्यपैति ततो ग्रामादिसंक्रमे सति, अपगते तद्भावे नागरकभावे नास्त्येव वधेऽपि भङ्गः प्रत्याख्यानस्य तथाभिसन्धेः । अथ नापैत्यत्राह । अनपगते आपुरुषमभिसन्धिना अनिवृत्ते नागरकभावे किमिह ग्रामेण तत्रापि वधविरतिविषयस्तथापुरुषभावानिवृत्तेरिति ॥

न य सइ तसभावंमि थावरकायगयं तु सो वहइ ।
तम्हा अणायमेयं मुद्धमइविलोहणं नेयं ॥ १३२ ॥

[न च सति त्रसभावे स्थावरकायगतमसौ हन्ति ।
तस्मादज्ञातमेतत् मुग्धमतिविलोभनं ज्ञेयं ॥ १३२ ॥]

न च सति त्रसभावे नैव विद्यमान एव त्रसत्वे स्थावरकायग-

तमसौ हन्ति अपरित्यक्ते त्रसत्वे स्थावरकायगमनाभावात् तस्मादज्ञातमेतत् उक्तन्यायादनुदाहरणमेतत् मुग्धमतिविलोभनं ज्ञेयं ऋजुमतिविस्मयकरं ज्ञातव्यमिति ॥

इदानीं अन्यद्वादस्थानकम्।

अन्ने उ दुहियसत्ता संसारं परिअडंति पावेण।
वावाएयव्वा खलु ते तक्कवणट्ठया विंति ॥ १३३ ॥

[अन्ये तु दुःखितसत्त्वाः संसारं पर्यटन्ति पापेन।
व्यापादयितव्याः खलु ते तत्क्षपणार्थं ब्रुवते ॥१३३॥]

अन्ये तु संसारमोचका ब्रुवत इति योगः। किं ब्रुवत इत्याह दुःखितसत्त्वाः कृमिपिपीलिकादयः संसारं पर्यटन्ति संसारमवगाहन्ते पापेनापुण्येन हेतुना यतश्चैवमतो व्यापादयितव्याः खलु ते खल्वित्यवधारणे व्यापादयितव्या एव ते दुःखितसत्त्वाः, किमर्थमित्याह, तत्क्षपणार्थं पापक्षपणनिमित्तमिति ॥

ता पाणवहनिवित्ती नो अविसेसेण होइ कायव्वा।
अवि अ सुहिएसु अन्नह करणिज्जनिसेहणे दोसो१३४

[तत्प्राणवधनिवृत्तिः नो अविशेषेण भवति कर्तव्या
अपि च सुखितेषु अन्यथा करणीयनिषेधने दोषः१३४]

यस्मादेवं तत्तस्मात्प्राणवधनिवृत्तिर्नाविशेषेण भवति कर्तव्या अपि च सुखितेषु सुखितविषये कर्तव्या तद्व्यापादन एव दोषसंभवादन्यथा यद्येवं न क्रियते ततः करणीयनिषेधने दोषः कर्त-

च्यो हि परलोकार्थिना दुःखितानां पापक्षयः तन्निवृत्तिकरणे प्रव्रज्यादिदाननिवृत्तिकरणवद्दोष इत्येष पूर्वपक्षः ॥ अत्रोत्तरमाह ।

तहवहभावे पावक्खओ त्ति न उ अट्टज्झाणओ बंधो।
तेसिमिह किं पमाणं नारगनाओवगं वयणं ॥१३५॥

[तथावधभावे पापक्षय इति न त्वार्तध्यानतो बन्धः।
तेषामिह किं प्रमाणं नारकन्यायोपगं वचनम् ॥१३५॥]

तथा तेन प्रकारेण वधभावे व्यापत्तिकरणे पापक्षय एव न त्वार्तध्यानतो बन्धस्तेषां दुःखितानामपि किं प्रमाणं न किंचिदित्यर्थः, अत्राह, नारकन्यायोपगं वचनं नारकन्यायानुसारि वचनं प्रमाणमिति । एतदेव भावयति ॥

तेसिं वहिज्जमाण वि परमाहम्मिअसुरेहि अणवरयं ।
रुद्दज्झाणगयाण वि न तहा बंधो जहा विगमो॥१३६॥

[तेषां वध्यमानानामपि परमाधार्मिकसुरैरनवरतम् ।
रौद्रध्यानगतानामपि न तथा बन्धो यथा विगमः१३६]

तेषां नारकाणां वध्यमानानां हन्यमानानामपि कैः परमाधार्मिकसुरैरम्बादिभिरनवरतं सततं रौद्रध्यानगतानामपि न तथा बन्धो यथा विगमः कर्मणो दुःखानुभवादिति गाथार्थः । कथमेतन्निश्चीयत इत्यत्राह ।

नरगाउबंधविरहा अणंतरं तंमि अणुववत्तीओ ।
तदभावेवि य खवणं परूप्परं दुक्कयकरणाओ ॥१३७॥

[नरकायुर्बन्धविरहादनन्तरं तस्मिन्ननुत्पत्तेः।
तदभावेऽपि च क्षपणं परस्परं दुःखकरणात् ॥१३७॥]

नरकायुर्बन्धविरहात् न कदाचिन्नारको नरकायुर्बध्नाति, अत्रैव युक्तिमाह, अनन्तरं नरकोद्वर्तनसमनन्तरमेव तस्मिन्नरक एवानुत्पत्तेरनुत्पादात् न चान्यवहितमुत्पद्यत इति सिद्धान्तः, ततश्च यथेदं न बध्नाति तथान्यदपीत्यभिप्रायः। तदभावेऽपि च परमाधार्मिकाद्यभावेऽपि च पङ्कादिपृथिवीषु क्षपणं कर्मणस्तेषां परस्परं दुःखकरणादन्योन्यपीडाकरणेन " परस्परोदीरितदुःखाः " (तत्त्वार्थाधिगमसूत्रम् ३। ४) इति वचनात् नान्यनिमित्तं क्षपणमिति स्यादप्रतिष्ठाने नान्यनिमित्तमित्येतदाशङ्क्याह।

अपइट्ठाणंमि वि संकिलेसओ चेव कम्मखवणं ति।
न हि तयभावंमि सुरो तत्थ वि य खवेइ तं कम्मं१३८

[अप्रतिष्ठानेऽपि संक्लेशत एव कर्मक्षपणमिति।
न हि तदभावे सुरस्तत्रापि च क्षपयति तत्कर्म १३८]

अप्रतिष्ठानेऽपि सप्तमनरकपृथिवीनरके संक्लेशत एव तथोत्क्षेपनिपातजनितदुःखादेव कर्मक्षपणमिति नान्यथा, न यस्मात्तदभावे संक्लेशाभावे सुरो देवस्तत्रापि नरके यथासंभवं कथंचिद्गतः सन् षष्ठादन्यत्र च संक्लेशरहितः क्षपयति तत्कर्म यत्प्रबाहतो नरकवेदनीयमिति ॥ उपसंहरन्नाह।

तम्हा ते वहमाणो अट्टज्झाणाइगं जणंतो वि।
तक्कम्मक्खयहेउं न दोसवं होइ णायव्वो ॥ १३९ ॥

---

१ तमस्तमायां.

[तस्मात्तान् प्रणार्तध्यानादिकं जनयन्नपि ।
तेषां कर्मक्षयहेतुर्न दोषवान् भवति ज्ञातव्यः ॥१३९॥]

यस्मादेवं तस्मात्तान् दुःखितान्प्राणिनः घ्नन् व्यापादयन् आर्तध्यानादिकं जनयन्नपि आर्तरौद्रध्यानं चित्रं च संक्लेशं कुर्वन्नपि तेषां कर्मक्षयहेतुस्तेषां दुःखितानां कर्मक्षयनिमित्तमिति कृत्वा न दोषवान् भवति ज्ञातव्यः संसारमोचक इति अयमपि पूर्वपक्षः। अत्रोत्तरमाह ।

चिट्ठउ ता इह अन्नं तक्खवणे तस्स को गुणो होइ ।
कम्मक्खउ त्ति तं तुह किंकारणगं विणिद्दिट्ठं ॥१४०॥

[तिष्ठतु तावदिहान्यत्तत्क्षपणे तस्य को गुणो भवति ।
कर्मक्षय इति तत्तव किंकारणकं निर्दिष्टम् ॥ १४० ॥

तिष्ठतु तावदिह प्रक्रमेऽन्यद्वक्तव्यं तत्क्षपणे दुःखितसत्त्वकर्मक्षपणे तस्य क्षपयितुर्दुःखितसत्त्वव्यापादकस्य को गुणो भवति न हि फलमनपेक्ष्य प्रवर्तते प्रेक्षावानिति, अथैवं मन्यसे कर्मक्षय इति कर्मक्षयो गुण इत्याशङ्क्याह । तत्कर्म तव हे वादिन् किंकारणं किंनिमित्तं निर्दिष्टं प्रतिपादितं शास्त्र इति ॥

अन्नाणकारणं जइ तदवगमा चेव अवगमो तस्स ।
किं वहकिरियाइ तओ विवज्जओ तीइ अह हेऊ१४१

[अज्ञानकारणं यदि तदपगमादेवापगमस्तस्य ।
किं वधक्रियया ततः विपर्ययः तस्या अथ हेतुः॥१४१॥]

अज्ञानकारणं अज्ञाननिमित्तं यदि एतदाशङ्क्याह तदपगमा-

देवाज्ञाननिवृत्तेरेवापगमस्य निवृत्तिरूपस्य कर्मणः कारणाभावात् कार्याभाव इति न्यायात्किं वधक्रियया ततः अप्रतिपक्षत्वात्तस्या विपर्ययः तस्या वधक्रियायाः अथ हेतुरवधक्रियेति एतदाशङ्क्याह ।

मुत्ताण कम्मबंधो पावइ एवं निरत्थगा मुत्ती ।
अह तस्स पुन्नबंधो तओ वि न अंतरायाओ॥१४२॥

[मुक्तानां कर्मबन्धः प्राप्नोति एवं निरर्थका मुक्तिः ।
अथ तस्य पुण्यबन्धः तकोऽपि नान्तरायात्॥ १४२ ॥]

मुक्तानां कर्मबन्धः प्राप्नोति तस्यावधक्रियानिमित्तत्वात् मुक्तानां चावधक्रियोपेतत्वात्, एवं निरर्थका मुक्तिर्बन्धोपद्रुतत्वात्। अथैवं मन्यसे तस्य दुःखितसत्त्वव्यापादकस्य पुण्यबन्धो गुणो न तु कर्मक्षय इत्येतदाशङ्क्याह तकोऽपि न असावपि गुणो नान्तरायात्कारणादिति । एतदेव भावयति ।

वहमाणो ते नियमा करेइ वहपुन्नमंतरायं से।
ता कह णु तस्स पुन्नं तेसिं खवणं व हेऊओ ॥१४३॥

[घ्नन् तान् नियमात्करोति वधपुण्यान्तरायमर्मीषाम्।
तत्कथं तु तस्य पुण्यं तेषां क्षपणवदहेतुकत्वात्॥१४३॥]

घ्नन् व्यापादयंस्तान् दुःखितसत्त्वान्नियमादवश्यमेव करोति निर्वर्तयति असौ व्यापादकः वधपुण्यान्तरायमर्मीषां दुःखितसत्त्वानां जीवन्तो हि तेऽन्यदुःखितवधेन पुण्यं कुर्वन्ति व्यापादने तेषां अन्यवधाभावात्पुण्यान्तरायं यस्मादेवं तत्तस्मात्कथं नु

तस्य व्यापादकस्य पुण्यं नैवेत्यर्थः कुतः अहेतुकत्वादिति योग
न ह्यन्यपुण्यान्तरायकरणं पुण्यहेतुरिति सिद्ध एव हेतुः। दृष्टान्
माह तेषां क्षपणवत् तेषां दुःखितसत्त्वानां व्यापाद्यमानानां क
क्षपणवदिति, अयमत्र भावार्थः, दुःखितसत्त्वव्यापत्त्या कर्मक्ष
इत्यभ्युपगमः ततश्च व्यापाद्यमानानामन्यव्यापादनाभावादहे
कत्वाकुतः कर्मक्षय इति।

अह सगयं वहणं चिय हेऊ तस्स त्ति किं परवहेणं
अप्पा खलु हंतव्वो कम्मक्खयमिच्छमाणेणं ॥१४४

[अथ स्वगतं हननमेव हेतुस्तस्य इति किं परवधेन।
आत्मैव हन्तव्यः कर्मक्षयमिच्छता ॥ १४४ ॥]

अथैवं मन्यसे स्वगतमात्मगतं हननमेव जिघांसनमेव हेतुस्त
कर्मक्षयस्यैतदाशङ्क्याह इति किं परवधेन एवं न किंचित्परव्य
पादनेनात्मैव हन्तव्यः कर्मक्षयमिच्छता स्वगतवधस्यैव त
मित्तत्वादिति ॥

अह उभयक्खयहेऊ वहु त्ति नो तस्स तन्निमित्ताओ
अविरुद्धहेउजस्स य न निवित्ती इयरभावे वि॥१४५

[अथोभयक्षयहेतुर्वध इति न तस्य तन्निमित्तत्वात्।
अविरुद्धहेतुजस्य च न निवृत्तिरितरभावेऽपि ॥१४५

अथैवं मन्यसे उभयक्षयहेतुर्वधः व्यापाद्यव्यापादककर्मक्षय
हेतुर्व्यापादनं कर्तृकर्मभावेन तदुभयनिमित्तत्वादस्येत्येतदाशङ्क्य

ह नैतदेवं कृतस्यस्य कर्मणस्तन्निमित्तत्वात्तद्विरुद्धवधक्रियाजन्यत्वात्, यदि नामैवं ततः किमिति अत्राह अविरुद्धहेतुजस्य च निवृत्तिहेतुत्वाभिमताविरुद्धकारणजन्यस्य च वस्तुनो न निवृत्तिर्न विनाशः इतरभावेऽपि विनाशकारणाविरोधिपदार्थभावेऽपीति। एतदेव भावयति॥

हिमजणियं सीयं चिय अवेइ अनलाओ नायवो वेइ।
एवं अणब्भुवगमे अइप्पसंगो बला होइ॥ १४६॥

[हिमजनितं शीतमेवापैत्यनलात् नातपोऽपैनि।
एवमनभ्युपगमेऽतिप्रसङ्गो बलाद्भवति॥ १४६॥]

हिमजनितं शीतमेवापैत्यनलात् शीतकारणविरोधित्वादनलस्य नातपोऽपैति तत्कारणाविरोधित्वादनलस्य एवमनभ्युपगमे कारणविरोधिनः सकाशान्निवृत्तिरित्यनङ्गीकरणेऽतिप्रसङ्गो बलाद्भवति तन्निवृत्तिवत्तदन्यनिवृत्तिलक्षणा अव्यवस्था नियमेनापद्यत इति। एतदेवाह।

तब्भावंमि अ जं किंचि वत्थु जत्तो कुओ वि न हविज्जा
एवं च सव्वभावो पावइ अनुनविरकाए॥ १४७॥

[तद्भावेऽपि च यत्किंचित् वस्तुजातं कुतश्चित् न भवेत्।
एवं च सर्वाभावः प्राप्नोत्यन्योन्यापेक्षया॥ १४७॥]

तद्भावेऽपि चातिप्रसङ्गभावे च यत्किंचिदत्र वस्तुजातं यतः कुतश्चित्सकाशान्न भवेत् अप्रतिपक्षादपि निवृत्त्यभ्युपगमात्। अ-
[illegible], एवं च सति सर्वाभावः प्राप्नोति अशेषपदार्थाभाव

आपद्यते, कुतो ऽन्योन्यापेक्षया अविरोधिनमप्यन्यमपेक्ष्यान्यस्य निवृत्तिरन्यं वान्यस्येति शून्यतापत्तिरिति ॥

अह तं अहेउगं चिय कहं नु अन्थि त्ति अवगमो कह य ।
नागासमाइयाणं कुओवि सिद्धो इह विणासो ॥१४८॥

[अथ तदहेतुकमेव कथं स्वर्स्तीति अपगमः कथं च ।
नाकाशादीनां कुतश्चित्सिद्ध इह विनाशः ॥ १४८ ॥]

अथैवं मन्यसे तत्कर्माहेतुकमेव निर्हेतुकमेवास्त्येतदाशङ्क्याह कथं स्वस्तीति नैवास्ति तदहेतुत्वात् खरविषाणादिवत्, आकाशादिना अहेतुकेन सता व्यभिचारमाशङ्क्याह अपगमः कथं विनाशश्च कथमस्येति एतदेव भावयति नाकाशादीनां नाकालधर्मास्तिकाय-प्रभृतीनां कुतश्चिदपि कुटादेः सिद्ध इह विनाशः अहेतुकत्वेन नित्यत्वादिति ॥

इहु चिय अफलत्ता नो कायव्वो वहु त्ति जीवाणं ।
वहहेउगं चिय तयं कहं निवित्ती तओ तस्स ॥१४९॥

[अतोऽपि अफलत्वात् न कर्तव्यो वधो जीवानाम् ।
वधहेतुकमेव तत् कथं निवृत्तिस्ततस्तस्य ॥ १४९ ॥]

अतो ऽपि चाहेतुककर्माविनाशित्वेन अफलत्वात् कर्मक्षयफल-शून्यत्वात् न कर्तव्यो वधो जीवानामिति । वधहेतुकमेव तत्स्या-द्वधनिमित्तमेव तत्कर्मेत्येतदाशङ्क्याह कथं केन प्रकारेण निवृत्ति-र्व्यावृत्तिस्ततस्तस्मादहेतुकात्तस्य कर्मणः न हि यतो भवति ततस्त एव न भवति भवनाभावप्रसङ्गादिति ।

ह नैतदेवं कुतस्तस्य कर्मणस्तन्निमित्तत्वात्तद्विरुद्धवधक्रियाजन्यत्वात्, यदि नामैवं ततः किमिति अत्राह अविरुद्धहेतुजस्य च निवृत्तिहेतुत्वाभिमताविरुद्धकारणजन्यस्य च वस्तुनो न निवृत्तिर्न विनाशः इतरभावेऽपि विनाशकारणाविरोधिपदार्थभावेऽपीति। एतदेव भावयति॥

हिमजणियं सीयं चिय अवेइ अनलाओ नायवो वेइ।
एवं अणब्भुवगमे अइप्पसंगो वला होइ॥ १४६॥

[हिमजनितं शीतमेवापैत्यनलात् नातपोऽपैति।
एवमनभ्युपगमेऽतिप्रसङ्गो बलाद्भवति॥ १४६॥]

हिमजनितं शीतमेवापैत्यनलात् शीतकारणविरोधित्वादनलस्य नातपोऽपैति तत्कारणाविरोधित्वादनलस्य एवमनभ्युपगमे कारणविरोधिनः सकाशान्निवृत्तिरित्यनङ्गीकरणेऽतिप्रसङ्गो बलाद्भवति तन्निवृत्तियत्तदन्यनिवृत्तिलक्षणा अव्यवस्था नियमेनापद्यत इति। एतदेवाह।

तब्भावंमि अ जं किंचि वत्थु जत्तो कुओ वि न हविज्जा
एवं च सव्वभावो पावइ अनुन्नविकाए॥ १४७॥

[तदभावेऽपि च यत्किंचित् वस्तुजातं कुतश्चित् न भवेत्।
एवं च सर्वाभावः प्राप्नोत्यन्योन्यापेक्षया॥ १४७॥]

तद्भावेऽपि चातिप्रसङ्गभावे च यत्किंचिदत्र वस्तुजातं यतः कुतश्चित्सकाशान्न भवेत् अप्रतिपक्षादपि निवृत्त्यभ्युपगमात्। अत्रानिष्टमाह, एवं च सति सर्वाभावः प्राप्नोति अशेषपदार्थाभाव

[अथ तत्स्वयमेव तकः क्षपयति इतरदपि किं न एवमेव।
कालेन क्षपयत्येव उपक्रमः क्रियते वधेन ॥ १५२ ॥]

अथैवं मन्यसे तत्पुण्यं स्वयमेव तक आत्मनैवासौ सुखितः क्षपयत्यनुभवेनैव वेदयतीत्येतदाशङ्क्याह इतरदपि पापं किं न एवमेव किं न स्वयमेव दुःखितः क्षपयति क्षपयत्येवेत्यर्थः । अथैवं मन्यसे कालेन प्रदीर्घेण क्षपयत्येव नात्रान्यथाभाव उपक्रमः क्रियते वधेन तस्यैव प्रदीर्घकालवेद्यस्य पापस्य स्वल्पकालवेद्यत्वमापाद्यते व्यापत्तिकरणेनेति एतदाशङ्क्याह ।

इयरस्स किं न कीरइ सुहीण भोगंगसाहणेणेवं ।
न गुण त्ति तंमि खविए सुहभावो चेव तत्तुत्ति १५३

[इतरस्य किं न क्रियते सुखिनां भोगाङ्गसाधनेन एवं ।
न गुण इति तस्मिन् क्षपिते सुखभावादेव तदिति १५३]

इतरस्येति पुण्यस्य किं न क्रियते उपक्रमः सुखिनां भोगाङ्गसाधनेन काश्मीरादेः कुंकुमादिसंपादनेन। अथैवं मन्यसे एवमुपक्रमद्वारेण न गुण इति तस्मिन्पुण्ये क्षपिते द्रुतः सुखभावादेव तत् इति ततः पुण्यात्सुखस्यैव प्रादुर्भावादिति एतदाशङ्क्याह ।

निरुवमसुक्खो मुक्खो न य सइ पुन्ने तओ त्ति किं न गुणो।
पावोदयसंदिद्धो इयरंमि उ निच्छओ केण ॥ १५४ ॥

[निरुपमसौख्यो मोक्षःनच सति पुण्ये तक इति कथं न गुणः
पापोदयसंदिग्ध इतरस्मिन् तु निश्चयः केन ॥ १५४ ॥]

निरुपमसौख्यो मोक्षः सकलाबाधानिवृत्तेरुभयसिद्धत्वान्न च

तम्हा पाणवहोवज्जियस्स कम्मस्स खवणहेउत्ता।
तद्विरई कायव्वा संवररूव त्ति नियमेणं ॥ १५० ॥

[तस्मात्प्राणवधोपार्जितस्य कर्मणः क्षपणहेतुत्वात्।
तद्विरतिः कर्तव्या संवररूपेति नियमेन ॥ १५० ॥

यस्मादेवं वधहेतुकमेव तत्तस्मात्प्राणवधोपार्जितस्य कर्मणः क्षपणहेतुत्वात्तद्विरतिर्वधविरतिः कर्तव्या संवररूपेति वधविरतिविशेषणा नियमेनावश्यतयेति ॥ किं च

सुहिएसु वि वहविरई कह कीरइ नत्थि पावमह तेसु।
पुन्नक्खओ वि हु फलं तब्भावे मुक्तिविरहाओ ॥१५१॥

[सुखितेष्वपि वधविरतिः किं क्रियते नास्ति पापमथ तेषु।
पुण्यक्षयोऽपि फलमेव तद्भावे मुक्तिविरहात् ॥१५१॥]

सुखितेष्वपि प्राणिषु वधविरतिर्व्यापादननिवृत्तिः किं क्रियते भवद्भिर्नास्ति पापं क्षपणीयमथ तेषु सुखितेषु पुण्यनिमित्तत्वात्तस्य एतदाशङ्क्याह पुण्यक्षयोऽपि तद्व्यापत्तिजनितः फलमेव अत्रापीष्यते वधविरतिप्रसङ्गः कथं पुण्यक्षयः फलं तद्भावे पुण्यभावे मुक्तिविरहात् मोक्षाख्यप्रधानफलाभावात् पुण्यापुण्यक्षयनिमित्तत्वात्तस्येति।

अह तं सयं चिय तओ खयेइ इयरं पि किं न एमेव।
कालेणं खवइ चिय उवक्कमो कीरइ यहेण ॥ १५२ ॥

[अथ तत्स्वयमेव तकः क्षपयति इतरदपि किं न एवमेव।
कालेन क्षपयत्येव उपक्रमः क्रियते वधेन ॥ १५२ ॥]

अथैवं मन्यसे तत्पुण्यं स्वयमेव तक आत्मनैवासौ सुखितः क्षपयत्यनुभवेनैव वेदयतीत्येतदाशङ्क्याह इतरदपि पापं किं न एवमेव किं न स्वयमेव दुःखितः क्षपयति क्षपयत्येवेत्यर्थः । अथैवं मन्यसे कालेन प्रदीर्घेण क्षपयत्येव नात्रान्यथाभाव उपक्रमः क्रियते वधेन तस्यैव प्रदीर्घकालवेद्यस्य पापस्य स्वल्पकालवेद्यत्वमापाद्यते व्यापत्तिकरणेनेति एतदाशङ्क्याह ।

इयरस्स किं न कीरइ सुहीण भोगंगसाहणेणेवं ।
न गुण त्ति तंमि खविए सुहभावो चेव तत्तुत्ति १५३
[इतरस्य किं न क्रियते सुखिनां भोगाङ्गसाधनेन एवं ।
न गुण इति तस्मिन् क्षपिते सुखभावादेव तदिति १५३]

इतरस्येति पुण्यस्य किं न क्रियते उपक्रमः सुखिनां भोगाङ्गसाधनेन काश्मीरादेः कुंकुमादिसंपादनेन। अथैवं मन्यसे एवमुपक्रमद्वारेण न गुण इति तस्मिन्पुण्ये क्षपिते कुतः सुखभावादेव तत् इति ततः पुण्यात्सुखस्यैव प्रादुर्भावादिति एतदाशङ्क्याह ।

निरुवमसुक्खो मुक्खो न य सइ पुन्ने तओ त्ति किं न गुणो।
पावोदयसंदिद्धो इयरंमि उ निच्छओ केण ॥ १५४ ॥

[निरुपमसौख्यो मोक्षःनच सति पुण्ये तक इति कथं न गुणः
पापोदयसंदिग्ध इतरस्मिन् तु निश्चयः केन ॥ १५४ ॥]

निरुपमसौख्यो मोक्षः सकलाबाधानिवृत्तेरुभयसिद्धत्वान्न च

सति पुण्ये तकोऽसौ पुण्यक्षयनिमित्तत्वात्तस्येति एवं कथं न गुणः पुण्योपक्रमकरणे गुण एव। अथैवं मन्यसे पापोदयसंदिग्धोऽसौ न ह्यत्र निश्चय उपक्रमेण पुण्ये क्षपिते तस्य मोक्ष एव भविष्यति न तु पापोदय इति, एतदाशङ्क्याह इतरस्मिन् तु दुःखितपापक्षपणे निश्चयः केन यदुत तस्यैवमेवार्थो न पुनरनर्थ इति एतदेव भावयति ॥

दुहिओ वि नरगगामी वहिओ सो अवहिओ वहू अन्ने।
वहिऊण न गच्छिज्जा कयाइ ता कह न संदेहो॥१५५॥

[दुःखितोऽपि नरकगामी हतः सो ऽहतो बहून्नन्यान्।
हत्वा न गच्छेत् कदाचित् तस्मात्कथं न संदेहः १५५]

दुःखितोऽपि भर्त्स्यबन्धादिर्नरकगामी हतः सन् कदाचित्स्यादिति योगः नरकसंवर्तनीयस्य कर्मणः उ [illegible] त्संभवात् वेद्यमानोपक्रमे च तदुदयप्रसङ्गात् स एव [illegible]ोऽव्यापादितः सन् बहूनन्यान् दुःखितान् हत्वा त्वन्मतेर्नि[illegible]पेक्षयान्न गच्छेत् कदाचित् यस्मादेवं तस्मात्कथं न [illegible]हः दुःखितपापक्षपणेऽपि संएवेति ॥ अधुना प्रागुपन्यस्तं नारकन्यायमधिकृत्याह।

नेरइयाण वि तह देहवेयणातिसयभावओ भायं।
नाईवसंकिलेसो समोहयाणं व विन्नेओ ॥ १५६ ॥

[नारकानामपि तथा देहवेदनातिशयभावतः प्रायः।
[illegible]ः समवहतानामिव विज्ञेयः ॥ १५६ ॥]

नारकानामप्युदाहरणतयोपन्यस्तानां तथा तेन प्रकारेण नरकवेदनीयकर्मोदयजनितेन देहवेदनातिशयभावतः शरीरवेदनायास्तीव्रभावेन प्रायो बाहुल्येन नातीवसंक्लेशः क्रूरादिपरिणामलक्षणः समयहतानामिव विज्ञेयः वेदनातिशयेनान्तःकरणव्यापाराभिभवादिति एतदेवाह।

इत्थ वि समोहया मूढचेयणा वेयणाणुभवखिन्ना।
तंमित्तचित्तकिरिया न संकिलिस्संति अन्नत्थ १५७

[अत्रापि समयहता मूढचेतना वेदनानुभवखिन्नाः।
तन्मात्रचित्तक्रिया न संक्लिश्यन्ते अन्यत्र ॥ १५७ ॥]

अत्रापि तिर्यग्लोके समयहता वेदनासमुद्घातेनावस्थान्तरमुपनीता मूढचेतना विशिष्टस्वव्यापाराक्षमचैतन्या वेदनानुभवखिन्नाः तीव्रवेदनासंवेदनेन श्रान्ताः तन्मात्रचित्तक्रिया वेदनानुभवमात्रचित्तव्यापारा न संक्लिश्यन्ते न रागादिपरिणामं यान्ति अन्यत्र क्वचिदौ तत्रैव निरोधादिति।

ता तिव्वरागदोसाभावे बंधो वि पयणुओ तेसिं।
सम्मोहओ चिय तहा खओ वि णेगंतमुक्कोसो १५८

[तत्तीव्ररागद्वेषाभावे बन्धोऽपि प्रतनुस्तेषाम्।
सम्मोहत एव तथा क्षयोऽपि नैकान्तोत्कृष्टः ॥१५८॥]

यस्मादेवं तत्तस्मात्तीव्ररागद्वेषाभावे बन्धोऽपि प्रतनुस्तेषां समयहतानां निमित्तदौर्बल्यात् सम्मोहत एव तथा क्षयोऽपि

सति पुण्ये तत्रोऽसौ पुण्यक्षयनिमित्तत्वात्तस्येति एवं कथं न गुणः पुण्योपक्रमकरणे गुण एव। अथैवं मन्यसे पापोदयसंदिग्धोऽसौ न ह्यत्र निश्चय उपक्रमेण पुण्ये क्षपिते तस्य मोक्ष एव भविष्यति न तु पापोदय इति, एतदाशङ्क्याह इतरस्मिन् तु दुःखितपापक्षपणे निश्चयः केन यदुत तस्यैवमेवार्थो न पुनरनर्थ इति एतदेव भावयति ॥

दुहिओ वि नरगगामी वहिओ सो अवहिओ वहू अन्ने।
वहिऊण न गच्छिज्जा कयाइ ता कह न संदेहो॥१५५॥

[दुःखितोऽपि नरकगामी हतः सो ऽहतो बहूनन्यान्।
हत्वा न गच्छेत् कदाचित् तस्मात्कथं न संदेहः १५५]

दुःखितोऽपि मत्स्यबन्धादिर्नरकगामी हतः सन् कदाचित्स्यादिति योगः नरकसंवर्तनीयस्य कर्मणः [illegible] असंभवात् वेद्यमानोपक्रमे च तदुदयप्रसङ्गात् स एव [illegible]ऽव्यापादितः सन् बहूनन्यान् दुःखितान् हत्वा त्वन्मतेन [illegible]पेक्षयान्न गच्छेत् कदाचित् यस्मादेवं तस्मात्कथं न [illegible] दुःखितपापक्षपणेऽपि संदेह एवेति ॥ अधुना प्रागुपन्यस्तं नारकन्यायमधिकृत्याह।

नेरइयाण वि तह देहवेयणातिसयभावओ पायं।
नाईवसंकिलेसो समोहयाणं व विन्नेओ ॥ १५६ ॥

[नारकाणामपि तथा देहवेदनातिशयभावतः प्रायः।
कालेऽतिसंक्लेशः समवहतानामिव विज्ञेयः ॥ १५६ ॥]

नारकानामप्युदाहरणतयोपन्यस्तानां तथा तेन प्रकारेण नरकवेदनीयकर्मोदयजनितेन देहवेदनातिशयभावतः शरीरवेदनायास्तीव्रभावेन प्रायो बाहुल्येन नातीवसंक्लेशः क्रूरादिपरिणामलक्षणः समवहतानामिव विज्ञेयः वेदनातिशयेनान्तःकरणव्यापाराभिभवादिति एतदेवाह।

इत्थ वि समोहया मूढचेयणा वेयणाणुभवखिन्ना।
तंमित्तचित्तकिरिया न संकिलिस्संति अन्नत्थ १५७

[अत्रापि समवहता मूढचेतना वेदनानुभवखिन्नाः।
तन्मात्रचित्तक्रिया न संक्लिश्यन्ते अन्यत्र ॥ १५७ ॥]

अत्रापि तिर्यग्लोके समवहता वेदनासमुद्घातेनावस्थान्तरमुपनीता मूढचेतना विशिष्टस्वव्यापाराक्षमचैतन्या वेदनानुभवखिन्नाः तीव्रवेदनासंवेदनेन श्रान्ताः तन्मात्रचित्तक्रिया वेदनानुभवमात्रचित्तव्यापारा न संक्लिश्यन्ते न रागादिपरिणामं यान्ति अन्यत्र क्वचिदपि तत्रैव निरोधादिति।

ता तिव्वरागदोसाभावे बंधो वि पयणुओ तेसिं।
सम्मोहओ चिय तहा खओ वि णेगंतमुक्कोसो १५८

[तत्तीव्ररागद्वेषाभावे बन्धोऽपि प्रतनुस्तेषाम्।
सम्मोहत एव तथा क्षयोऽपि नैकान्तोत्कृष्टः ॥१५८॥]

यस्मादेवं तत्तस्मात्तीव्ररागद्वेषाभावे बन्धोऽपि प्रतनुस्तेषां समवहतानां निमित्तदौर्बल्यात् सम्मोहत एव तथा क्षयोऽपि

किं इय न तित्थहाणी किं वा वहिओ न गच्छई नरयं।
सीहो किं वा सम्मं न पावई जीवमाणो उ ॥१६९॥

[किमेवं न तीर्थहानिः किं वा वधितो न गच्छति नरकम्।
सिंहः किं वा सम्यक्त्वं न प्राप्नोति जीवन् तु ॥१६९॥]

किमेवं न तीर्थहानिस्तीर्थहानिरेव । किं वा वधितो व्यापादितः क्रूराशयत्वान्न गच्छति नरकं सिंहो गच्छत्येव । किं वा सम्यक्त्वं न प्राप्नोति जीवन् सिंहोऽतिशयवत्साधुसमीपे संभवति प्राप्तिरिति॥

किं वा तेणावहिओ कहिंचि अहिमाइणा न खज्जेजा
सो ता इहंपि दोसो कहं न होइ त्ति चिंतमिणं १७०

[किं वा तेनाहतः कथंचित् अह्यादिना न खाद्येत ।
स तस्मादिहापि दोषः कथं न भवतीति चिन्त्यमिदं १७०]

किं वा तेन सिंहेनाहतोऽव्यापादितः सन् कथंचिद्रजन्यां प्रमादादह्यादिना सर्पेण गोनसेन वा न खाद्येत स आचार्यः संभवति सर्वमेतत् यस्मादेवं तस्मादिहापि दोषो भवदभिमतः कथं न भवतीति चिन्त्यमिदं विचारणीयमेतदिति ॥ यतश्चैवमतः ।

सव्वपवित्तिअभावो पावइ एवं तु अन्नदाणे वि ।
तत्तो विसूइयाई न संभवंतित्थ किं दोसा ॥ १७१ ॥

[सर्वप्रवृत्त्यभावः प्राप्नोत्येवं तु अन्नदानेऽपि।
ततः विसूचिकादयः न संभवन्त्यत्र किं दोषाः॥१७१॥]

सर्वप्रवृत्त्यभावः प्राप्नोत्येवमागन्तुकदोषसंभवात् एवं च सत्यन्न-

दानेऽपि न प्रवर्तितव्ये । अपिशब्दाददानेऽपि । ततोऽन्नदानादेर्विसूचिकादयो विसूचिका मरणं अदाने प्रद्वेषतो धनहरणव्यापादनादयो न संभवन्त्यत्रान्नदानादौ किं दोषाः संभवन्त्येवेति ॥ तथा

सयमवि य अपरिभोगो एत्तो चिय एवं गमणमाईं वि ।
सव्वं न जुज्जइ चिय दोसासंकानिवित्तीओ ॥१७२॥

[स्वयमपि चापरिभोगः अत एव एवं गमनाद्यपि ।
सर्वं न युज्यत एव दोषाशंकानिवृत्तेः ॥ १७२ ॥

स्वयमपि चापरिभोगोऽन्नादेरत एवागन्तुकदोषसंभवादेव । एवं गमनाद्यपि गमनमागमनमवस्थानं सर्वं न युज्यत एव दोषाशङ्कानिवृत्तेः गच्छतोऽपि कण्टकवेधादिसंभवादागच्छतोऽपि अवस्थानेऽपि गृहपातादिसंभवदर्शनादिति ॥

अणिवित्ती वि हु एवं कहं कायव्व त्ति भणियदोसाओ ।
आलोयणं पि अवराहसंभवाओ ण जुत्तं ति ॥१७३॥

[अनिवृत्तिरपि खलु एवं कथं कर्तव्येति भणितदोषात् ।
आलोचनमपि अपराधसंभवात् न युक्तमिति ॥१७३॥]

अनिवृत्तिरप्येवं कथं कर्तव्येति भणितदोषादनिवृत्तित एव राजमयूरादिव्यापादनेन दोषसंभवात् । आलोचनमपि प्रागुपदिष्टं (१६७) आत्यन्तिककार्यविघातत्वात् किमप्येते आलोचयन्तीति चान्यापकारप्रवृत्तेरपराधसंभवात् युक्तमेवेति ॥ उपसंहरन्नाह

इय अणुभवलोगागमविरुद्धमेयं न नायसमयाणं ।
मइविब्भमस्स हेऊ पयणं भावत्थनिस्सारं ॥१७४॥

[एवं अनुभवलोकागमविरुद्धमेतत् न ज्ञातसमयानाम्।
मतिविभ्रमस्य हेतुः वचनं भावार्थनिस्सारम् ॥१७४॥]

इय एवं अनुभवलोकागमविरुद्धमेतत् । निवृत्तौ परिणामशुद्ध्यनुभवादनुभवविरुद्धं समुद्रादिप्रतरणादिप्रवृत्तेर्लोकविरुद्धं यस्य कस्यचिद्विधानादागमविरुद्धं एतत्पूर्वपक्षवादिवचनमिति योगः। न ज्ञातसमयानां नावगतसिद्धान्तानां मतिविभ्रमस्य हेतुः कथमेतच्छोभनं मतिविप्लवस्य कारणं किं विशिष्टं वचनं भावार्थनिस्सारं अभिप्रेतगर्भार्थशून्यमिति । यस्मादेवं

तम्हा विसुद्धचित्ता जिणवयणविहीइ दोवि सद्धाला।
वहविरइसमुज्जुत्ता पावं छिंदंति धिइबलिणो॥१७५॥

[तस्माद्विशुद्धचित्तौ जिनवचनविधिना द्वावपि श्रद्धावन्तौ
वधविरतिसमुद्युक्तौ पापं छिन्तः धृतिबलिनौ ॥१७५॥]

तस्माद्विशुद्धचित्तौ अपेक्षारहितौ जिनवचनविधिना प्रवचनोक्तेन प्रकारेण द्वावपि प्रत्याख्यातृप्रत्याख्यापयितारौ श्रद्धावन्तौ वधविरतिसमुद्युक्तौ यथाशक्त्या पालनोद्यतौ पापं छिन्तः कर्म क्षपयतः धृतिबलिनौ अप्रतिपतितपरिणामाविति ॥

सांप्रतमन्यद्दोषस्थानकम् ।

निच्चाण वहाभावा पयइअणिच्चाण चेव निव्विसया ।
एगंतेणेव इहं वहविरइं केइ मन्नंति ॥ १७६ ॥

[नित्यानां वधाभावात्प्रकृत्यनित्यानां चैव निर्विषया ।
एकान्तेनैव इह वधविरतिः केचन मन्यन्ते ॥ १७६ ॥]

जीवाः किल नित्या वा स्युरनित्या वेत्युभयथापि दोषः नित्यानां वधाभावात् प्रकृत्यनित्यानां चैव स्वभावभङ्गुराणां चैव वधाभावात् निर्विषया निरालंबना एकान्तेनैव अत्र पक्षद्वये का वधविरतिः संभवाभावात् केचन वादिनो मन्यन्त इति।
एतदेव भावयति

एगसहावो निच्चो तस्स कह वहो अणिच्चभावाओ।
पयइअणिच्चस्स वि अन्नहेऊभावाणवेक्खाओ॥१७७॥

[एकस्वभावो नित्यः तस्य कथं वधः अनित्यभावात्।
प्रकृत्यनित्यस्यापि अन्यहेतुभावानपेक्षातः॥ १७७॥]

एकस्वभावोऽप्रच्युतानुत्पन्नस्थिरैकधर्मा नित्यः तस्य कथं वधः जिघांसनमनित्यभावादतादवस्थ्यो नानित्यत्वापत्तेरित्यर्थः प्रकृत्यनित्यस्यापि स्वभावतोऽप्यनित्यस्य कथं वध इति वर्तते कथं च नेत्याह अन्यहेतुभावानपेक्षातः स्वव्यतिरिक्तहेतुसत्तानपेक्षत्वात् तत्स्वभावत्वे च स्वत एव निवृत्तेरिति। प्रक्रान्तोपचयमाह।

किं च सरीरा जीवो अन्नो णन्नो व हुज्ज जइ अन्नो
ता कह देहवहंमि वि तस्स वहो घडविणासे व्व १७८

[किं च शरीरात् जीवः अन्योऽनन्यो वा भवेत् यद्यन्यः।
तत्कथं देहवधेऽपि तस्य वधः घटविनाश इव॥१७८॥]

किं चान्यच्छरीरात्सकाशाज्जीवोऽन्योऽनन्यो वा भवेत् द्वयी गतिः किं चातः यद्यन्यस्तत्कथं देहवधे प्रकृतिविकारत्वेनार्थान्त-

रभूतदेहविनाशे तस्य जीवस्य वधो नैवेत्यर्थः घटविनाश इव न हि घटे विनाशिते जीववधो दृष्टः तदर्थान्तरत्वादिति ।

द्वितीयं विकल्पमधिकृत्याह

अह उ अणन्नो देह इ स तओ सव्वहा विणस्सिज्जा।
एवं न पुण्णपावा वहविरई किंनिमित्ता मे ॥१७९॥

[अथ त्वनन्यः देह इवासौ ततः सर्वथा विनश्येत् ।
एवं न पुण्यपापे वधविरतिः किं निमित्ता भवताम् १७९

अथ त्वनन्यः शरीराज्जीव इत्येतदाशङ्क्याह । देह इवासौ ततः अनन्यत्वाद्धेतोः सर्वथा विनश्येत् । शरीरं च विनश्यत्येव न परलोकयायि । एवं च न पुण्यपापे भोक्तृभावात् वधविरतिः किंनिमित्ता मे भवतां विरतिवादिनामिति एष पूर्वपक्षः । अत्रोत्तरमाह ।

निच्चाणिच्चो जीवो भिन्नाभिन्नो य तह सरीराओ ।
तस्स वहसंभवाओ तन्निरई कहमविसया उ॥१८०॥

[नित्यानित्यो जीवो भिन्नाभिन्नश्च तथा शरीरात् ।
तस्य वधसंभवात् तन्निरतिः कथमविषया तु ॥१८०॥]

एकान्तनित्यत्वादिभेदप्रतिषेधेन नित्यानित्यो जीवो द्रव्यपर्यायरूपत्वात् भिन्नाभिन्नश्च तथा शरीरात् तथोपलब्धेः अन्यथा दृष्टेष्टविरोधात् तस्य वधसंभवाद्धेतोस्तन्निरतिर्वधविरतिः कथमविषया नैवेत्यर्थः ।

नित्यानित्यत्वव्यवस्थापनायाह

निच्चाणिच्चो संसारलोगववहारओ मुणेयव्वो ।
न य एगसहावंमी संसाराई घडंति त्ति ॥ १८१ ॥

[नित्यानित्यः संसारलोकव्यवहारतः मुणितव्यः ।
न चैकस्वभावे संसारादयो घटन्त इति ॥ १८१ ॥]

नित्यानित्यो जीव इति गम्यते श्रुतः संसारलोकव्यवहारतो मुणितव्यः त एव सत्त्वा नरकं व्रजन्तीत्यादि संसारात् गत आगम इति लोकव्यवहाराच्च विज्ञेय इति । विपक्षव्यवच्छेदार्धमाह । न चैकस्वभावे न च नित्याद्येकधर्मिण्येवात्मनि संसारादयो घटन्त इति गाथासमुदायार्थः ॥ अधुना अवयवार्थमाह ।

निच्चस्स सहावंतरमपावमाणस्स कह णु संसारो ।
जंमाणंतरनट्ठस्स चेव एगंतओ मूलो ॥ १८२ ॥

[नित्यस्य स्वभावान्तरमप्नुवतः कथं नु संसारः ।
जन्मानन्तरनष्टस्यैव एकान्ततोऽमूलः ॥ १८२ ॥]

नित्यस्याप्रच्युतानुत्पन्नस्थिरैकस्वभावेन हेतुना स्वभावान्तरमप्राप्नुवतः सदैवैकरूपत्वात् कथं नु संसारो नैव विचित्रत्वात्तस्य जन्मानन्तरनष्टस्यैव च सर्वथोत्पत्त्यनन्तरापवर्गिणःएकान्ततोऽमूलः तस्यैव तथापरिणामैकल्पत एकान्तेनैवाकारणः श्रुतः संसार इति

एसो चिय ववहारो गमणागमणाइ लोगसंसिद्धो
न घडइ जं परिणामी तम्हा सो होइ नायव्वो॥१८३॥

[अत एव व्यवहारो गमनागमनादिर्लोकसंसिद्धः ।
न घटते यत् परिणामी तस्मात् असौ भवति ज्ञातव्यः१८३]

अत एवानन्तरोदितादेकान्तनित्यत्वादेर्हेतोर्व्यवहारो गमनागमनादिर्न घटते एकत्रैकस्वभावस्याध्यासितदेशाव्यतिरेकेण देशान्ताध्यासायोगात् अन्यत्र च तस्यैवाभावेनापरानुत्पत्तेरिति । आदिशब्दात्स्थानशयनासनभोजनादिपरिग्रहः यद्यस्मादेवं तस्मात्परिणाम्यसावात्मा भवति ज्ञातव्यः, परिणामलक्षणं चेदं ।

परिणामो ह्यर्थान्तरगमनं न तु सर्वथा व्यवस्थानं ।
न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥ १ ॥ इति ।

एतदेव भावयति

जह कंचणस्स कंचणभावेण अवट्ठियस्स कडगाई ।
उप्पज्जंति विणस्संति चेव भावा अणेगविहा॥१८४॥

[यथा कांचनस्य कांचनभावेन अवस्थितस्य कटकादयः ।
उत्पद्यन्ते विनश्यन्ति चैव भावा अनेकविधाः॥१८४॥]

यथा काञ्चनस्य सुवर्णस्य काञ्चनभावेन सर्वभावानुयायिन्या सुवर्णसत्तया अवस्थितस्य कटकादयः कटककेयूरकर्णालंकारादयः उत्पद्यन्ते आविर्भवन्ति विनश्यंति च तिरोभवन्ति च भावाः पर्यायाः अनेकविधा अन्वयव्यतिरेकवन्तः स्वसंवेदनसिद्धा अनेकप्रकारा इति

एवं च जीवदव्वस्स दव्वपज्जवविसेसभइयस्स ।
निच्चत्तमणिच्चत्तं च होइ णाओवलभंतं ॥ १८५ ॥

[एवं च जीवद्रव्यस्य द्रव्यपर्यायविशेषभूतस्य ।
नित्यत्वमनित्यत्वं च भवति न्यायोपलभ्यमानम्१८५]

एवं च जीवद्रव्यस्य त्रिविधिनिष्ठस्य द्रव्यपर्यायविशेषभूतस्या नुभयनिष्ठया उभयरूपतया विकल्पितस्य नित्यत्वमनित्यत्वं च भवति न्यायोपलभ्यमानं । पृथग्विभक्तिकरणं द्वयोरपि निमित्त भेदख्यापनार्थं न्यायः पुनरिह नारकादयवस्थासु मिथो भिन्नास्वपि जीवान्वय उपलभ्यते तस्मिंश्च नारकादिभेद इति ।

द्वितीयपक्षमधिकृत्याह ।

एगंतेण सरीरादन्नत्ते तस्स तक्कओ बंधो ।
न घडइ न य सो कत्ता देहादत्थंतरभूओ ॥१८६॥

[एकान्तेन शरीरादन्यत्वे तस्य तत्कृतः बन्धः ।
न घटते न चासौ कर्ता देहादर्थान्तरभूतः ॥ १८६ ॥]

